CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
SDPB

Coll. No. 599

Title Nirnayasindhu

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 599 Subject: Dharma śāstra

Title: Nirṇaya sindhu

Author: Kamalākara Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 8.4" by 4.9" Extent: 52 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

||श्रीगणेशाय नमः|| कारुण्यैकनिकेतं रामं सीतालतायुतं कं|| विश्व
त्राणव्रततिं समाजयशाखिनं वंदे||१|| लक्ष्मीसहायं कमलासुत
रंजितगोकुलं|| बर्हापीडं घनश्यामं महः किंचिदुपास्महे||२|| वेदार्थध
र्मरक्षार्थे मायामानुषरूपिणं|| पितामहं गुरुं वंदे भट्टनारायणाह्वयं||३||
यत्पादसंस्मृतिः सर्वमंगलप्रतिभूर्मता|| ताननंतरामभट्टाख्यान् श्री
तातचरणान्नुमः||४|| सर्वकल्याणसंदोहनिदानं यत्पदद्वयं|| धनरी
सोदरामंबामुमाख्यां नौमि सादरं||५|| बिंदुमाधवपादाब्जरोलंबीभू
तविग्रहं|| न्यायांभोजातरं नद्दादिवाकरमुपास्महे||६|| हेमाद्रिमाधव
मते प्रविचार्य सम्यग्गौन्यत्तत्वमथ तीर्थकृतां परेषां|| श्रीरामभट्टत
नयः कमलाकराख्यः कालेषु धामतिविनिर्णयमातनोति||७|| संति य
द्यपि विद्वांसस्तन्निबंधाश्च कोटिशः|| तथाप्यमुष्य वैदग्ध्यं केचिद्विज्ञातु शिवः
मीशते||८|| तत्र संक्षेपतः कालः षोढा|| वत्सरोयनमृतुर्मासः पक्षो दि
वस इति|| तत्राद्यो माधवमते पंचधा|| सावनः सौरश्चांद्रो नाक्षत्रो बा १

र्हस्पत्य इति|| गुरोर्मध्यमराशिभोगेन बार्हस्पत्यः|| स च ज्योतिःशास्त्रे प्रसि
द्धः|| हेमाद्रिस्त्वनयोर्धर्मशास्त्रेषु प्रयोगास्तित्र एवविधा आह|| तत्र वत्सप्र
माणः सावनादिद्वादशमासैस्तत्तदब्दः|| मलमासे तु षष्टिदिनात्मक एको मा
स इति द्वादशमासत्वमविरुद्धं|| तथा च व्यासः|| षष्ट्या तु दिवसैर्मासः कथितो
बादरायणैरिति|| तत्र चांद्रोब्दः षष्टिभेदः|| तदाह गर्गः|| प्रभवो विभवः शुक्लः
प्रमोदोथ प्रजापतिः|| अंगिराः श्रीमुखो भावो युवा धातेश्वरस्तथा||१|| बहुधा
न्यः प्रमाथी च विक्रमोथ वृषस्तथा|| चित्रभानुः सुभानुश्च तारणः पार्थिवो
व्ययः||२|| सर्वजित्सर्वधारी च विरोधी विकृतः खरः|| नंदनो विजयश्चैव जय
यो मन्मथदुर्मुखौ||३|| हेमलंबो विलंबोथ विकारी शार्वरी प्लवः|| शुभकृच्छो
भनः क्रोधी विश्वावसुपराभवौ||४|| प्लवंगः कीलकः सौम्यः साधारणविरो
धकृत्|| परिधावी प्रमादी च आनंदो राक्षसो नलः||५|| पिंगलः कालयुक्तश्च
सिद्धार्थी रौद्रदुर्मती|| दुंदुभी रुधिरोद्गारी रक्ताक्षः क्रोधनः क्षय इति||६|| यद्य
पि ज्योतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां साधारणप्रवृत्तिः [illegible]

तथापि प्रत्नवादीनां चांद्रत्वमप्यस्ति॥ चांद्राणां प्रत्नवादीनां पंचके पंचके युगे
इति माधवोक्तेः॥ तेन चांद्रप्रत्नवादिः चैत्रे सिते प्रवर्त्तते॥ बार्हस्पत्यस्तु माधवो
तयोर्विनियोगो ज्योतिर्निबंधे ब्रह्मसिद्धांते॥ व्यावहारिकसंज्ञोयं कालः स्मृत्या
दिकर्मसु॥ योज्यः सर्वत्र तत्रापि जैवो वा नर्मदोत्तरे॥ आर्ष्टिषेणः॥ स्मृते सर्वत्र
कर्मादौ चांद्रं संवत्सरं सदा॥ नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्त्तितेति॥ अ
यनं तु सौरर्तुत्रितयात्मकं॥ सौरर्तुत्रितयं प्रदिष्टमयनं मितिदीपिकोक्तेः॥ त
द्द्विविधं॥ दक्षिणमुत्तरं चेति॥ कर्कसंक्रांतिर्दक्षिणं मकरे त्वं॥ अनयोर्विनियो
गमाह मदनरत्ने सत्यव्रतः॥ देवतारामवाप्यादिप्रतिष्ठा दक्षुरवरवो॥ दक्षिणामा
सु रवेश्चैवन्न तत्फलमवाप्नुयात्॥ वैखानसः॥ मातृभैरववाराहनरसिंहत्रि
विक्रमाः॥ महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने॥ अत्र चवैशब्दोऽप्यर्थे न तु
दक्षिणायन एवेति नियमः॥ इदं वचनं दक्षिणायने निषिद्धाया देवप्रतिष्ठाया शिव
देवविशेषप्रतिप्रसवमात्रात्॥ रत्नमालायां॥ गृहप्रवेशत्रिदशप्रतिष्ठाविवा
हचौलव्रतबंधदीक्षाः॥ सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे तु॥ २
अस्यापवादः॥ काशीखंडे॥ सदा स्नानं तथु गंचास्तु सदाचास्तु नारायणं॥ सदामहो
चेर

रयश्चास्तु काश्यां निवसतां सतां॥ इत्ययनं॥ ऋतुर्मासद्वयात्मा॥ मलमासेत्व
मासद्वयात्मकृएको मासस्तेन मासद्वयात्मकमविरुद्धं॥ स द्वेधा॥ चांद्रः सौरश्च॥
चैत्रारंभो वसंतादिश्चांद्रः॥ मीनारंभो मेषारंभो वा सौरः॥ मीनमेषयोर्मेषवृ
षयोर्वा वसंत इति बौधायनोक्तेः॥ अनयोर्विनियोगमाह त्रिकांडमंडनः॥ श्रौ
स५ तस्मार्त्तक्रियाः सर्वाः कुर्याच्चांद्रमसेषु॥ तदन्यावेतु सौरर्तु बिस्तिर्ज्योतिर्विदां
मतं॥ स द्विविधोपि षोढा॥ वसंतो ग्रीष्मो वर्षाः शरद्धेमंतः शिशिर इति॥ इति
ऋतुः॥ मासश्चतुर्द्धा॥ सावनः सौरश्चांद्रो नाक्षत्र इति॥ त्रिंशद्दिनः सावनः॥
अर्कसंक्रांतेः संक्रांत्यवधिः सौरः॥ सौरमासप्रसंगात्संक्रांतिनिर्णय उच्य
ते॥ तत्र पूर्वतोपि परतोपि संक्रमात्पुण्यकालघटिकास्तु षोडशेति सामा
न्यतः पुण्यकालः सर्वैरुक्तः॥ विशेषस्तूच्यते॥ अत्र माधवकाः संग्रहश्लोकाः॥
प्राग्दश दश पूर्वतः षडवनिस्तद्वत्पराः पूर्वतस्त्रिंशत्षोडश पूर्वतोथ प
रतः पूर्वापराः स्फुर्दश॥ पूर्वाः षोडश चोत्तराऋतुयुगे पश्चात्ववशात्पुन
पूर्वाः षोडश चोत्तरा धुनरयोः पुण्यास्तु मेषादितः॥ अस्यार्थः॥ मेषे प्राग्दश
दश घटिकाः पुण्यकालः॥ वृषे पूर्वाः षोडश॥ मिथुने पराः षोडश॥ कर्के द

वास्त्रिंशत॥ सिंहे पूर्वाः षोडश॥ कन्यायां पराः षोडश॥ तुलायां प्राग्दश दश॥
वृश्चिके पूर्वाः षोडश॥ धनुषि पराः षोडश॥ मकरे चत्वारिंशत्पराः॥ इदं च हे-
माद्रिमते नोक्तं॥ माधवमते त्वत्र पराविंशतिः पुण्याः॥ कुंभे पूर्वाः षोडश॥ मी-
ने पराः षोडशेति॥ याः पक्षत्रास्त्वन्यतमा मयोक्ता सायंसंध्या यदि सापि पूर्वा॥
पूर्वाह्णयोक्ता यदि सा विज्ञाते साप्युत्तरा रात्रिनिषेधतः स्यात॥ अर्वाक्निशी-
थाद्यदि संक्रमः स्यात्पूर्वेह्नि पुण्यं परतः परेह्नि॥ आसन्नयामद्वयमेव पुण्यं
निशीथमध्ये तु दिनद्वयं स्यात॥ कर्केऽप्येवमिति तत्किवाच हेमाद्रिस्तूरिस्थत
या परार्कः॥ ऋषः प्रदोषे यदि वार्द्धरात्रे परेह्नि पुण्यं त्वयथ कर्कटश्चेत॥ प्रभात
काले यदि वा निशीथे पूर्वेह्नि पुण्यं त्वयमाधवार्यः॥ अत्र मूलवचनानि मा-
धवापरार्कहेमाद्र्यादिषु द्रष्टव्यानि॥ सर्वासु संक्रांतिषु दानविशेषो हेमाद्रौ
दानकांडे उक्तः॥ विश्वामित्रः॥ मेषसंक्रमणे भानोर्मेषदानं महाफलं॥ वृ- शि व॥
षसंक्रमणे दानं गवां प्रोक्तं तथैव च॥ वस्त्रान्नपानदानानि मिथुने विहिता-
नि च॥ घृतधेनुप्रदानं च कर्कटेपि विशिष्यते॥ सत्सुवर्णं छत्रदानं सिंहे- 3
पि विहितं सदा॥ कन्याप्रवेशे वस्त्राणां वेश्मनां दानमेव च॥ तुलाप्रवेशे ति-

लानां गोरसानामपीष्यते॥ अन्नकी वलिते भानौ दीपदानं महाफलं॥ अन्नकी वृश्चिकः॥
धनुःप्रवेशे वस्त्राणां यानानां च महाफलं॥ ऋषप्रवेशे दारूणां दानमग्नेस्तथैव च॥
कुंभप्रवेशे दानं तु गवामंबुतृणस्य च॥ मीनप्रवेशे स्नानानां माल्यानामपि चोत्तममिति॥
अत्रोपवासमाह हेमाद्रावापस्तंबः॥ अयने विषुवे चैव त्रिरात्रोपोषितो नरः॥ स्नात्वा यः सू-
र्यं येन्नत्वा तु सर्वकामफलं लभेत्॥ अन्नाक्तौ तु वृद्धवसिष्ठः॥ अयने संक्रमे चैव ग्रहणे चंद्र-
सूर्ययोः॥ अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते॥ अत्रोपवासः संक्रांतिदिने दाना-
दिकं पुण्यकालदिने इत्याचार्यचूडामणिः॥ विधिना ध्रुवा तु पुण्यकालदिने एवोभय-
मिति वृद्धाः॥ इदं च पुत्रिगृहस्थातिरिक्तविषयं॥ आदित्येह्नि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥
उपवासो न कर्तव्यः पुत्रिणा गृहिणा तथेति जैमिनिवचनात्॥ अत्र श्राद्धमुक्तं हेमाद्रौ
विष्णुधर्मे॥ श्राद्धं संक्रमणे भानोः मवा स्तं पृथिवीपते॥ अपरार्केपि विष्णुः॥ आदित्य
संक्रमणं विषुवायनद्वयं जन्मभमन्यदयं प्राप्य एतांस्तु श्राद्धकालान्नैकाम्याना
ह प्रजापतिरिति॥ षडशीत्यादिदिने रवांगयनां त्र्य प्रहत्रावपि पुण्यं वक्ष्यमयनग्रहणं॥
अन्यथा संक्रमेणाभिद्धेरयनग्रहणं व्यर्थं स्यादित्यपरार्कः॥ हेमाद्रावपि गालवः॥ अय
नांशकतुल्येन कालेनैव स्फुटं भवेत्॥ मृगकर्कादिके सूर्ये याम्योदगयने मतिः॥ तदा

संक्रांतिकालेस्फुटक्ताविष्णुपदादयइति॥ अयनांशचलतिरूपेसंक्रांतिकालेविष्णु
पदादयःप्रवर्त्तंते। तेनतद्युक्तंपुण्यकालादितत्रापिज्ञेयमितिसएवव्याख्येयो॥ तत्र
मेषायनंवृषायनमित्यादिसर्वत्रज्ञेयं। माधवीयेपिउक्तावाक्यैः॥ संक्रांतिषुयथाका
लस्तदीयेप्ययनेतथा। अयनेविंशतिःपूर्वामकरेविंशतिःपरेति। मकरायनेपूर्वाविंश
तिघटिकाःपुण्याः। मकरसंक्रांतौतुपश्चाद्विंशतिःपुण्याः। अन्यत्रायनेतत्संक्रांतिवद्वि
त्यर्थः॥ विष्णुपदादिस्वरूपंचदीपिकायामुक्तं॥ हूयंक्ति ईषसिंहवृश्चिकघटेष्वर्कस्ययः
संक्रमःकन्यामीनधनुर्नृयुक्षडशीत्यास्यंतुलामेषयोः। प्रोक्तंतद्विषुवंझषेयनमु
दक्कर्कटकेदक्षिणमिति। इयंत्रिविष्णुपदं॥ न्युक्तमिथुनं। अत्रपिंडरहितंश्राद्धंकु
र्यात्॥ तथाचापरार्केमात्स्ये॥ अयनद्वितयेश्राद्धंविषुवद्वितयेतथा। संक्रांतिषुचस
र्वासुपिंडनिर्वपणादृतइति। श्राद्धस्यनपाणिकृतस्यनिर्मूलत्वात्समूलत्वेपि। ततः
प्रभृतिसंक्रांतावुपरागादिपर्वसु। त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टंमृताहनि इतिमा शिवः
त्स्योक्तेर्ग्रहणाग्रहणवद्विकल्पएवत्याहु॥ तन्न। अस्यपार्वणविधायकत्वेनपिंडावि
धायकत्वात्। पिंडाव्यक्तिः॥ (मंगलस्नेष्ठेषुविशेषमाह) अन्यथैकपदेपिंडानुवादेत्रि ॥६॥
त्वविधौचवषट्कर्तुःप्रथमभक्षवदैरूप्यापत्तेः। मंगलस्थेषुविशेषमाहज्योतिर्नि

न्बादकतोनर

बंधेनारदः॥ त्याज्याःसूर्यस्यसंक्रांतेःपूर्वतःपरतस्तथा॥ विवाहादिषुकार्येषुना
ड्यःषोडशषोडश॥ एतत्तुल्यकालोपलक्षणं॥ नानोःसंक्रांतिभोगश्चक्रेजिकस्या
द्वैयामिकइतिज्योतिःप्रकाशोक्तत्र्येषुपरिगणनात्॥ अयनव्यतिरिक्तासुदशासु
संक्रांतिषुरात्रौस्नानश्राद्धादिनकार्यं॥ अर्किसंक्रमणेपुण्यमहःकृत्स्नंप्रकीर्ति
तं॥ रात्रौसंक्रमणेनानोर्दिनार्द्धंस्नानदानयोः॥ अर्द्धरात्राद्धस्तस्मिन्मध्याह्नस्यो
परिक्रिया॥ ऊर्द्ध्वंसंक्रमणेचोर्द्ध्वमुदयात्प्रहरद्वयं॥ पूर्णेचेदर्द्धरात्रेतुयदासंक्रम
तेरविः॥ प्राक्दिनद्वयंपुण्यंमुक्त्वामकरकर्कटौ॥ वितिवृद्धवसिष्ठादिवचनै
रहःपुण्यत्वोक्तेः॥ रात्रौसंक्रमणेनानोर्दिवाकुर्यात्कृतक्रियां॥ पूर्वस्मात्परतोवा
पिप्रत्यासन्नस्यतत्फलमितिवसिष्ठदर्शनादयंत्रिरात्रौस्नानादिनिषेधप्रतीतेः॥
नि यातु। विवाहव्रतसंक्रांतिप्रतिष्ठाऋतुजन्मसु॥ तथोपरागपातादौस्नानेदाने
निशाशुभेति॥ राहुदर्शनेसंक्रांतौविवाहात्ययवृद्धिषु॥ स्नानदानादिकंकुर्युर्नि
शिकाम्यव्रतेषुचेत्यादीनिविष्णुधर्मादिवचनानितानिमकरकर्कसंक्रांति
विषयाणिमुक्त्वामकरकर्कटाविति तयोर्दिवानुष्ठानस्यपर्युदस्तत्वादिति
हेमाद्रिमाधवादयः॥ वस्तुतस्तुप्राणुक्तवचनेनतयोर्दिनद्वयपुण्यत्वा

दूरेवपर्युदासान्मकरकर्कयोरपिस्नानदानंपरेहनीत्यादिनिरहस्तुत्यक्तोक्तेः॥
अहःस्पृगेवत्वानुपपत्त्याकल्प्यनिषेधस्यचप्रत्यक्षरात्रिविधिनाबाधात्सर्वसंक्रां
तिषुरात्रावनुष्ठानविकल्पः॥सचदेशाचाराद्व्यवस्थितइतियुक्तःपंथाः॥अय
नयोरुक्तवक्ष्यमाणयोर्विशेषःश्रावणेमाघेचवक्ष्यते॥ज्योतिर्निबंधेगर्गः॥यस्यजन्म
र्क्षमासाख्यरविसंक्रमणंभवेत्॥तन्मासाभ्यंतरेतस्यवैरक्लेशधनक्षयाः॥त
गरसरोरुहपत्रैर्जनीसिद्धार्थलोध्रसंयुक्तैः॥स्नानंजन्मर्क्षगतेरविसंक्रमणे
न्हणांछिन्नरं॥हेमाद्रौ॥अह्निचेद्रात्रियुग्मंस्याद्रात्रौचेद्वासरद्वयं॥संक्रांतिः
पातिनीज्ञेयादानाध्ययनकर्मसु॥यत्तुगौडाः॥संक्रांत्यांपक्षयोरंतेद्वादश्यांश्राद्ध
वासरे॥सायंसंध्यांनकुर्वीतकुर्वन्पितृहाभवेदितिकर्मप्रदीपिन्यांव्यासोक्तेः॥
सायंकालेसंध्यानिषेधमाहुस्तन्निर्मूलं॥अन्यच्चबहुवक्तव्यंविस्तरभीतेर्नो
च्यते॥ ॥इतिसंक्रांतिनिर्णयः॥ ॥पक्षसुगजश्चांद्रोमासः॥सद्वेधा॥शुक्ला
दिरमांतः॥कृष्णादिःपूर्णिमांतश्च॥तथाचत्रिकांडमंडनः॥चांद्रेतिपक्षकेप निव:
क्षादिःकृष्णादिर्वेतिचद्विधेष्यते शुक्लादेशान्तेदेनतद्व्यवस्थामाह॥कृष्णपक्षादि ५
कंमासंनांगीकुर्वंतिकेचन॥येपीच्छंतिनतेषामपीष्टोविंध्यस्यदक्षिणइति॥

विंध्यदक्षिणेकृष्णादिनिषेधादुत्तरतोद्वयोरप्यनुज्ञागम्यते॥तत्रापिशुक्लादिर्मुख्यः॥कृ
ष्णादिर्गौणः॥शास्त्रेषुचैत्रशुक्लप्रतिपद्येवचांद्रसंवत्सरारंभोक्तेः॥तदुक्तंदीपिकायां॥
चांद्रोब्दोमधुशुक्लगप्रतिपदारंभइति॥नहियेकृष्णादिंमन्यंतेतेषांसंवत्सरारंभोभिद्य
ते॥अतःशुक्लादिर्मुख्यः॥कृष्णादिनामलमासासंभवाच्च॥चंद्रस्यसर्वनक्षत्रभोगेननाक्ष
त्रोमासः॥सावनादीनांव्यवस्थोक्ताहेमाद्रौब्रह्मसिद्धांते॥अमावास्यापरिच्छिन्नोमासःस्या
द्ब्राह्मणस्यतुसंक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्ययोः॥अत्रब्राह्मणादीनांवचनांतर
गयत्रकर्मविशेषवसंतेब्राह्मणोग्नीनादधीतेत्यादिवत्मासउक्तस्तत्रैदर्शांतत्वमात्रं
नियम्यतेनतुसर्वकर्मसुदर्शांतएवेति॥वृद्धाग्ध्यर्यस्तोभनरेहीषादिनिधननानियमवा
धिनाघवात्त्स॥त्रैवर्णिकानांसर्वकर्मसुमासद्विशेषविधेःसावनादीनांमासेविशेषानु
नोमादिपरत्वापत्तेश्चेतिगुरुचरणाः॥ज्योतिर्गर्गः॥सौरोमासोविवाहादौयज्ञादौसावनः
स्मृतः॥आब्दिकेपितृकार्येचचांद्रोमासःप्रशस्यते॥ऋष्यशृंगः॥विवाहव्रतयज्ञेषुसौरंमा
नंप्रशस्यते॥पार्वणेत्वष्टकाश्राद्धेचांद्रमिष्टंतथाब्दिके॥स्मृत्यंतरे॥एकाहेष्वविवाहादौ
षणादौसौरसावनौ॥ज्योतिर्गर्गः॥आयुर्दायविभागश्चप्रायश्चित्तक्रियातथा॥सावनेनैव
कर्तव्याशत्रूणांचाप्युपासना॥विष्णुधर्मे॥नाद्वसत्राण्ययनानिचांद्रेमासेनकुर्यात्

नगणनमकेनेति। आह। तिथितत्त्वेतुलक्षादिंव्रतेष्वकादिमेव च। विवाहादौ च सौ
रादिं मासं सत्येविनिर्दिशेत्॥ ॥अथमलमासः॥ ॥तत्रैकसंक्रांतिरहितः सितादि
श्चांद्रो मलमासः। एकसंक्रांतिराहित्यमसंक्रांतत्वेन संक्रांतिद्वयवत्त्वेन च भवति। तिम
लमासो द्वेधा॥ अधिकमासः क्षयमासश्चेति। तदुक्तं काठकगृह्ये। यस्मिन्मासे न संक्रांतिः
संक्रांतिद्वयमेव वा। मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश इति। सत्यव्रतोपि। राशि
द्वयं यत्र मासे संक्रमेत दिवाकरः। नाधिमासो न वै दृष्टो मलमासस्तु केवलमिति। अधि
कमासस्य कालनियममाह वसिष्ठः॥ द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा। घटि
कानां चतुष्केण पतत्यधिकमासकः। एतच्च सावनादिमानेन संभवार्थं न तु नियमार्थं॥
अन्यथा षोडशदिनाधिकद्वात्रिंशन्मासानंतरं लक्षपक्षनियमेन शुक्लादित्वभंगाप
त्तेः॥ तेन न्यूनाधिककालेमलमासपातेपि न दोषः। अत एवोक्तं माधवीये। मासे त्रिंशत्त
मे भवेदिति॥ क्षयस्यापि ज्योतिःशास्त्रे॥ असंक्रांतमासोधिमासः स्फुटं स्यात् द्विसंक्रांति
मासः क्षयाख्यः कदाचित्। क्षयः कार्त्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येधिमासद्वयं
च एकः क्षयात्सर्वं परतश्चैक इत्यधिमासद्वयं भवतीत्यर्थः। अत्र विशेषमाह जाबालिः।
मासद्वयेब्दमध्ये तु संक्रांतिर्न यदा भवेत्। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः॥

शिवः ॥ ६ ॥

उत्तर एव कालाधिकं न सर्वस्मिन्नित्यर्थः॥ यत्तु ब्रह्मसिद्धांते॥ चैत्रादर्वाङ् नाधि
मासः परतस्त्वधिको भवेत्॥ यच्च ज्योतिःसिद्धांते॥ घटकन्यागते सूर्ये वृश्चिके
वाथ धन्विनि॥ मकरे वाथ कुंभे वा नाधिमासो विधीयते॥ तत्र क्षय एव न माघ
कमासस्य कालाधिक्यनिषेधार्थं॥ नत्वधिकमात्रस्य॥ दृश्यते हि फाल्गुनादीनां
मायो माघस्य च क्वचित्। नपुंसकत्वं नवनीत्येषशास्त्रविनिश्चय इति। हेमाद्रि
विलुधर्मविरोधात्॥ मलमासे इष्टकादिनिषेधानुपपत्तेश्च॥ मकरे वाथ कुंभे नैवे
ति दृष्टांतार्थं॥ प्रायस्त्वाद्वा॥ क्षयमासगमनकालमुक्तं सिद्धांतशिरोमणौ॥ ग
तोब्ध्यद्रिनंदैर्मिते शाककाले तिथीशैर्भविष्यत्यथांगाक्षसूर्यैः॥ गजाद्र्यग्निभू
मिस्तथा प्रायशोयं कुवेदेंदु वर्षैः क्वचिद्गोकुभिश्च॥ अस्यार्थः॥ अब्धयः
सप्त॥ नंदा नव॥ एतेषां प्रातिलोम्येन पाते॥ ९७४॥ तैर्मिते वर्षे कश्चित्क्षयमा
सः सर्वं जात इत्यर्थः॥ तिथयः पंचदश॥ ईशाः एकादश॥ १११५॥ एवंमिते याते
कश्चिद्भविष्यतीत्यर्थः॥ अंगाः ६ अक्षाः ५ सूर्याः १२ एकत्र १२५६॥ गजाः ८ अद्रयः ७ अग्नि
३ भूः १ एकत्र १३७८॥ कुः १ वेदाः ४ इंदुः १ एकत्र १४१॥ गावः ९ कुः १ एकत्र १९॥ एतैर्मि
ते वर्षे याते कश्चित्क्षयो भविष्यतीत्यर्थः॥ ॥अथ मलमासे कार्याकार्यं निरूप्यते॥

तत्रकाबालिः॥ नित्यनैमित्तिके कुर्यात् श्राद्धं कुर्यान्मलिम्लुचे॥ तिथिनक्षत्रवा
रर्क्षं काम्यं नैव कदाचन॥ अयं च काम्यनिषेधः आरब्धसमाप्तिविषयः॥ अस्
र्यनाम्ययेमासान्तेषु मलमासमतः॥ व्रतानां चैव यज्ञानामारंभश्च समापनमि
ति तन्नैवास्कृत्वात्॥ अस्पृष्टोऽधिमासा इत्यर्थः॥ तत्र मेडलं तपतेरवेरितिव
चनात्॥ कारीयादिः काम्यस्य त्वारंभसमाप्ती न भवत एवेत्यादिरन्यत्र विस्तरः॥ का
ठकगृह्येपि॥ मलेनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियामिति॥ तानि नैमित्ति
कादीनि दीपिकायामुक्तानि॥ यन्नैमित्तिकमग्निनष्टानुगताग्न्याधानमन्वीसु
वासंस्कारादि विलोपने स्मृतिपुनःप्रोक्तं प्रतिष्ठादिकमिति॥ गत्यंतरस्यु तंत्व
सोमादिहृयमेवा॥ तत्र कर्तव्यान्युक्तानि कालादर्शे॥ द्वादशाहसपिंडीतं कर्मग्र
हणजन्मनोः॥ सीमंतपुंसवे श्राद्धं द्यावेतौ जातकर्म च॥ रोगे शांतिरलब्धे च यो
गे श्राद्धं अतानि च॥ प्रायश्चित्तं निमित्तस्य तथा पूर्वेपरत्र च॥ अबोदकं च मे
च न्वादिमहालययुगादिषु॥ मन्वादिषु यद्दानं दानं देवोदितं च यत्॥ तिलगो
भूहिरण्यानां संध्योपासनयोः क्रिया॥ पर्वहोमश्चाग्रयणमप्यरिष्टिश्च प शिवः
र्वणि॥ श्राद्धं दर्शे प्रहरहः श्राद्धम्नादिमासिकं॥ मलिम्लुचान्यमासेषु म ७

तानां श्राद्धमाब्दिकं॥ श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेव युगादिषु॥ नित्याग्निहोत्रहोम
श्च देवतातिथिपूजनं॥ स्नानं च स्नानविधिना पयन्नत्याज्यापेय वर्जनं॥ तर्पणं
वा निमित्तस्य नित्यत्वादुत्तयत्रेचेति॥ एतौ पुंसवसीमंतौ॥ रतश्चगंतोधानाद्य
न्नप्राशनांतसंस्कारोपलक्षणं॥ तदुक्तं दीपिकायां॥ गर्भाधानमुखं च चौलवि
धितः प्राग्जातयागं विना॥ सदृष्टाग्रयणं गजेंद्र उपरतः छाया मघा नंदयोस्ती
र्थे दुर्लभयोगश्च पित्र्यमधिके मास्येवमाद्याचरेदिति॥ अलभ्ययोगेऽर्धोदय
पद्मकादौ काम्यान्यपि व्रतादीनि कार्याणीत्यर्थः॥ पूर्वे परत्र मलेऽपि चेत्यर्थः॥ म
हालयशब्देन मघात्रयोदशी च इति माधवः॥ दर्शश्राद्धं मलेपि कार्यं॥ य
त्कृष्णशृंगः॥ संवत्सरातिरेकेण मासोऽयं स्यान्मलिम्लुचः॥ तस्मिन्नेव यो दर्शश्राद्धं
न कुर्यात् हिंडुसंशय इति॥ तत्काम्यदर्शश्राद्धविषयं॥ काम्यं नैव कदाचनेति वच
नात्॥ दर्शे च काम्यश्राद्धं॥ कन्यां कन्यावेदिनश्चेत्यादिना याज्ञवल्क्येनोक्तं॥ नित्यं
तु मलेपि भवत्येव॥ दर्शेप्यहरहःश्राद्धदानं च प्रतिवासरं॥ गोभूतिलहिरण्या
नां मासेपि स्यान्मलिम्लुचे इति माधवोक्तेरितिहेमाद्र्यादयः॥ दिवोदासीये पि॥
अनिंदुरिंदुश्चाचहरिवारो बुधाष्टमी॥ नाधिमासे परित्याज्याः सीमंतान्ना

शान्तेशिशोरिति॥ अनिंदुर्दर्शः॥ द्विविधमप्यमाश्राद्धं न कार्यमिति त्वपरार्कः॥ न
न्वयद्विहितं कर्मतत्तेरमासि कारयेदित्युक्तेः॥ षष्ट्याश्चरिवमेरिति शुद्धमासकरणे
पिशास्त्रार्थोपपत्तेर्दर्शश्राद्धं मलेन कार्यमिति प्राचीनगौडाः॥ शूलपाणिश्च॥ सं
वत्सरप्रदीपेपि॥ एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्॥ दर्शश्राद्धं तदा हेया
त्परत्र मलिम्लुचे॥ अत्रापि प्राग्वद्व्यवस्था॥ यद्यपि कालादर्शे सर्वं वार्षिकं मास
द्वये कार्यमित्युक्तं॥ तथापि हेमाद्रिमाधवापरार्कादिमतात्प्रथमवार्षिकं मल
मासे द्वितीयाब्दिकं तु शुद्धमास एव कार्यं॥ असंक्रांतेपि कर्तव्यमाब्दिकं प्रथमं द्वि
जैः॥ तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति हारीतोक्तेः॥ आब्दिकं प्रथमं यस्या
त्तत्कुर्वीत मलिम्लुचे॥ चतुर्दशे तु संप्राप्ते कुर्वीत पुनराब्दिकमिति स्मृत्यंतरो
क्तेश्च॥ पुनराब्दिकं द्वितीयादिवार्षिकं त्रयोदशे मासे तीते चतुर्दशाद्यदिने कुर्या
दित्यर्थः॥ यत्तु सत्यव्रतः॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि॥ मलमासे न
कर्तव्यं व्याघ्रस्य वचनं यथेति॥ तद्द्वितीयादिवार्षिकविषयं॥ आब्दिकं प्रथमं शिव: ९
यस्यात्तत्कुर्वीत मलिम्लुच इति पूर्वोक्तवचनात्॥ तेन द्वितीयादि शुद्धमास एव॥
पृथ्वीचंद्रोदये दिवोदासीये मदनपारिजाते चैवं॥ मलमासमृतानां तु यदा

स एवाधिकः स्यात्तदा तत्रैव कार्यं॥ यथा पैठीनसिः॥ मलमासे मृतानां तु श्राद्धं य
त्प्रतिवत्सरं॥ मलमासेपि कर्तव्यं नान्येषां तु कथंचनेति॥ यत्तु वसिष्ठः॥ श्रा
द्धीयाहनि संप्राप्ते अधिमासो भवेद्यदि॥ मासद्वयेपि कुर्वीत श्राद्धमेवं न मुह्यति॥
यच्च व्यासः॥ उत्तरे दैवकार्याणि पित्र्यकार्याणि चोभयोरिति॥ तन्मासिकादिविष
यं॥ योगादिकं मासिकं च श्राद्धं चापरपाक्षिकं॥ मन्वादिकं तैर्थिकं च कुर्यान्मासद्व
येपि चेति स्मृतिचंद्रिकोक्तेः॥ तैर्थिकं तीर्थश्राद्धं॥ तच्च मासद्वयेपि कार्यमिति त्रि
स्थलीसेतौ भट्टाः॥ केचित्तु॥ प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं॥ मन्वादौ च
युगादौ च तन्मासोरुभयोरपीति मरीचिवचनात्॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रो
र्मृतेहनि॥ मासद्वयेपि तत्कुर्याद्व्याघ्रस्य वचनं यथेति गालवोक्तेश्च प्रत्याब्दि
कं मासद्वये कार्यमित्याहुः॥ तन्न॥ प्रतिमासं मृताहे क्रियमाणं मासिकं प्रति
संवत्सरं क्रियमाणं क्षयाहश्राद्धमिति मरीचिवचसो मदनरत्नाकरे व्याख्याना
त्॥ गालवीयस्य च मासद्वयात्मके क्षयमास इति माधवेन व्याख्यानात्॥ य
च्च केचिदुक्तं॥ प्रथमाब्दिकं मासद्वये कार्यं॥ आब्दिकं प्रथमं यस्या तत्कुर्वीत म
लिम्लुचे॥ त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकमिति यमोक्तेरिति॥ तदपि

न्चिंत्यं॥पुनराब्दिकादि द्वितीयादि वार्षिकं त्रयोदशोतीते चतुर्दशे कुर्यात्॥अन्यथा
सांवत्सरं न वर्द्धेत श्राद्धं तत्र मृतेहनि॥ निषेधो न भवि विरोधः स्यादिति हेमाद्रौ॥पृ
थ्वीचंद्रोदये च॥एतेन न वर्द्धेत छिंद्याद्वृद्धिपक्षे वेर्यादिवेत्यन्ये तन्न वृद्ध्याख्या॥
मानानां वात्सराणां॥ एवं व्याख्यायां तु हारीतीये प्रथमग्रहणमेव मानं॥ यद
पि निर्णयामृते॥ पूर्वोक्तकालादर्शवचनान्मलमासे श्राद्धदिनस्य वंध्यत्व
निरासनार्थं पितृद्देशेन ब्राह्मणान्भोजयित्वा शुद्धमासे पिंडश्राद्धं कुर्यात्॥
पिंडवर्जमसंक्रांते संक्रांते पिंडसंयुतं॥ प्रतिसंवत्सरं श्राद्धमेवं मासद्वये
पि चेति वृद्धपराशरोक्तेरिति॥ तदपि चिंत्यं॥ पूर्वोक्तवचनस्य क्षयपूर्वनाव्यधि
कमासविषयत्वात्॥ तत्र हि मासद्वये श्राद्धमुक्तं॥ तदाह सत्यतपाः॥ एकए
व यदा मासः संक्रांतिद्वयसंयुतः॥ मासद्वयगतं श्राद्धं मलमासेपि शस्यत इति॥
मासद्वयगतं पूर्वसंक्रांतगतं क्षयगतं च॥ मलमासे क्षयमासे॥ अपिशब्दान्न
त्वधिमासे चेति हेमाद्रिः॥ दीपिकापि॥ तस्मात्क्षयाधिमासको यदि न वेत्ति
त्र्यसांवत्सरं तस्मिन् शुद्धतया क्षये च वचनात्कुर्याद्बुधः कोविद इति॥ काला
दर्शोप्येतद्विषय एवेत्यलं बहुना॥ मलमासे वर्ज्यान्यकानिकान्यादर्शे॥ अनित्य शिवः ९

मनिमित्तं च दानं च महदादिकं॥ अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणं॥
देवारामतडागादिप्रतिष्ठामौंजीबंधनं॥ आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च
निःक्रमः॥ राजाभिषेकः प्रथमश्चूडाकर्मव्रतानि च॥ अन्नप्राशनमारंभो गृ
हाणां च प्रवेशनं॥ स्नानं विवाहो नामातिपन्नं देवमहोत्सवः॥ व्रतारंभसमा
प्तीच काम्यं काम्यं च पाप्मनां॥ प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत्॥ उ
पाकर्मोत्सर्जनं च पवित्रदमनार्पणं॥ अवरोहश्च हेमंतः सर्पाणां बलिरष्टका॥
ईशानस्य बलिः सिद्धिः शयनं परिवर्त्तनं॥ दुर्गेंद्रस्थापनोत्थानेध्वजोत्थानं च
वज्रिणः॥ एवं प्रतिषिद्धानि परत्रान्यच्चैदैविकमिति॥ अत्रमूलवचनानि
हेमाद्रिमाधवादिभ्यो ज्ञेयानि॥ क्षयमासमृतानां प्रत्याब्दिके विशेषो हेमाद्रौ
॥तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेर्द्धे तथोत्तरः॥ मासाविति बुधैश्चिंत्यौ क्षयमास
स्य मध्यगौ॥ दिवोदासीये॥ यात्रोत्सवं च देवादिशपथं दिव्यमेव च॥ मलमासे
न कुर्वीत व्यासस्य वचनं यथा॥ अयं निर्णयः क्षयमासेपि ज्ञेयः॥ रविसं
क्रमहीनेषो वर्ज्यावर्ज्यविधिः स्मृतः॥ स एव तु द्विसंक्रांतो मलमासेपरी

रितइतिकाव्यकप्रदीपोक्तेः॥ आद्विकवद्वर्ल्लपनेपिज्ञेयं॥ यत्रमलमासेवर्ज्य
मुक्तंतद्गुरुशुक्रयोरस्तादिष्वपिज्ञेयं॥ तदाहबृहस्पतिः॥ बालेवार्धदिवावृद्धे
र्कोचास्तंगतेगुरौ॥ मलमासइवैतानिवर्जयेद्देवदर्शनमिति॥ तथा॥ अनादि
दैवतांदृष्टाश्चशक्रनष्टनागवा॥ मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत्॥
आवृत्ततीर्थदोषाननावमात्रंनतुफलमितिवाचस्पतिमिश्राः॥ तत्र॥ अस्तिबा
धकेफलहेतुत्वाद्धतेः॥ लल्लोपि॥ नीचस्थेवक्रसंस्थेप्यतिचरणगतेबालवृद्धा
स्तगेवासंन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधस्तुदीक्षा॥ मौंजीबंधोंग
नानांपरिणयमनविधिर्वास्तुदेवप्रतिष्ठावर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौ
सिंहराशिस्थितेचेति॥ दीक्षायागदीक्षाग्रमदीक्षाच॥ तथा॥ उद्यानंचतडागं
तबंधदीक्षाविवाहयात्रांचवधूप्रवेशः॥ तडागकूपत्रिदशप्रतिष्ठाबृहस्पतौ
सिंहगतेनकुर्यात्॥ दिवोदासीये॥ गुर्वादित्येगुरौसिंहेनष्टेशुक्रेमलिम्लुचे॥ उ
द्वकर्मव्रतंयात्रांमनसापिनचिंतयेत्॥ अस्यापवादस्तत्रैवउक्तः॥ मुंडनंचोप शिवः
पवासंचगौतम्यांसिंहगेरवौ॥ कन्यागतेतुस्नायांनतुतत्तीरवासिनां॥ तथा॥ १०
भागीरथीगौतमीगंगाद्वितीयाजाह्नवीस्मृता॥ सर्वतीर्थफलंस्नानाद्गौतम्यांसिं

हगेगुरौ॥ संहिताप्रदीपे॥ स्यात्सप्तरात्रंगुरुशुक्रयोश्चबालत्वमन्यांदशकंचवृ
वार्द्धं॥ वृद्धौरसितेन्यावसुमितौशिशुत्वेशस्तोयतस्तावुपचीयमानाविति॥ वसि
ष्ठः॥ अतिचारगतेजीवेवर्जयेत्तदनंतरं॥ अतोवाहादिकार्येषुअष्टविंशतिवा
सरान्॥ बाल्यादिनक्षत्रमुक्तंज्ञानसिद्धांते॥ रविणासहितैरन्येषांग्रहाणामस्तमु
च्यते॥ ततोवार्द्धकवार्द्धकेप्रोक्तंमहद्बाल्यंप्रकीर्तितं॥ बाल्यादिपरिमाणंवृत्तशते॥
बालश्शुक्रोदिवसदशकंपंचकंचैववृद्धःपश्चादुक्तांत्रितयमुदितःपक्षमेवंक्र
मेण॥ जीवोवृद्धःशिशुरपितथापक्षमन्येःशिशुत्वेवृद्धप्रोक्तोदिवसदशकंचा
परैःसप्तरात्रं॥ पश्चिमतउदयेदशदिना॥ निबालः॥ अस्तेपंचदिनानिवृद्धः॥ पू
र्वतोदिनत्रयंबालः॥ पक्षंचवृद्धइत्यर्थः॥ जीवोगुरुः॥ अन्यत्रत्वन्ययोक्तं॥ प्राक्
पश्चादुदितःशुक्रःपंचसप्तदिनंशिशुः॥ विपरीतेतुवृद्धत्वंतद्वदेवगुरोरपि॥ ए
षांचपक्षाणांव्यवस्थामाहमिहिरः॥ बहुवादशिलाःकालायेबाल्येवार्द्धकेपिवा॥
प्राप्यास्तत्राधिकाःशेषादेशान्तेद्राक्सतापदीति॥ देशान्तेद्व्यमदनस्तोगार्ग्यः॥ शुक्रो
गुरुःप्राक्चपराक्चबालोविंध्येदशावंतिषुसप्तरात्रं॥ वंगेषुहूणेषुचषट्
चपंचदेशेचशेषत्रिदिनंवदंतीति॥ अस्यापवादःकाशीखंडे॥ नग्रहास्तो

द्वयन्तो दोषो विश्वेश्वरालये॥ त्रिस्थलीसेतौ वायवीये॥ गोदावर्यां गयायां च श्रीशै
ले ग्रहणद्वये॥ सुरासुरगुरूणां च मौढ्यदोषो न विद्यते॥ ग्रहणद्वये तन्निमित्तक
कुरुक्षेत्रयात्रादानादावित्यर्थः॥ तदाह त्रिस्थलीसेतौ लल्लः॥ उपप्लवे शीतलना
न्नान्वारब्धे दिवे वै कपिलाख्यषष्ठ्यां॥ सुरासुरेज्यास्तमयेपि तीर्थयात्राविधिः सं
क्रमेण चंद्रशस्तः॥ इत्यलं बहुना॥ मलमासव्रतविशेषा उक्ता हेमाद्रौ पाद्मे॥ अधि
मासे तु संप्राप्ते गुडसर्पिर्युतानि च॥ त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने॥ सा
ज्यानि गुडमिश्राणि अधिमासे नृपोत्तम॥ अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देव
ता॥ उद्दिश्यापूपदानेन पृथ्वीदानफलं लभेत्॥ त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे
निधाय च॥ सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत्॥ विष्णुरूपी सहस्रांशुः सर्व
पापप्रणाशनः॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु॥ नारायण जगद्बीज भास्क
र प्रतिरूपक॥ व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय॥ यस्य हस्ते गदाचक्रे गरुडो
यस्य वाहनं॥ शंखः करतले यस्य स मे विष्णुः प्रसीदतु॥ कलाकाष्ठादिरूपेण निमे
षघटिकादिना॥ यो वंचयति भूतानि तस्मै कालात्मने नमः॥ कुरुक्षेत्रमयं देशः
कालः पर्व द्विजो हरिः॥ पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम॥ मलानां च विशुद्ध्यर्थं शिवः ११

पापप्रशमनाय च॥ पुत्रपौत्रविवृद्ध्यर्थं तव दास्यामि भास्कर॥ मंत्रेणानेन यो
दद्यात्त्रयस्त्रिंशदपूपकान्॥ प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः इति॥ ॥
इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ क्षयमासमलमासनिर्णयः॥ ॥
पक्षनिर्णयस्तु॥ देवे शुक्लपक्षः कृष्णः पित्र्ये विशिष्यत इति माधवेनो
क्तः॥ अथ तिथिनिर्णयः॥ तत्र तिथिर्द्वेधा शुद्धा विद्धा च॥ दिने तिथ्यंतरसंब
न्धरहिता शुद्धा तत्सहिता विद्धा॥ तत्र शुद्धायामसंदेहाद्विद्धा निर्णीयते॥ तत्र सामा
न्यतो वेधमाह माधवीये पैठीनसिः॥ पक्षद्वयेपि तिथयस्तिथिं पूर्वां तथोत्तरां॥
त्रिभिर्मुहूर्त्तैर्विध्यंति सामान्योयं विधिः स्मृतः॥ हेमाद्रिमदनरत्नादौ तु विष्णु
धर्मेप्युक्तः॥ उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ॥ द्विमुहूर्तं त्रिरह्नश्च सा
तिथिर्हव्यकव्ययोरिति विष्णुधर्मोक्तेः॥ द्विमुहूर्तत्वं चानुकल्पः॥ द्विमुहूर्तापि
कर्त्तव्या या तिथिर्वृद्धिगामिनी इति दक्षेणापि शब्दोक्तेः॥ अयं च वेधः प्रातरेव सायं
तु त्रिमुहूर्त्तवेध एव॥ यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः॥ सा तिथि
स्तद्दिने प्रोक्ता त्रिमुहूर्तैव यान्नवादिति स्कांदोक्तेः॥ दीपिकापि॥ त्रिमुहूर्तेणार्के
सकला सायेति॥ यानिस्तु॥ व्रतोपवासस्नानादौ घटिकैकापि या भवेत्॥

उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके इत्यादीनि स्कांदादिवचनानि तानि वेधा
नराधिकरणन्यायेन अवयवस्तुत्या त्रिमुहूर्तप्रशंसापराणि ॥ तिथिविशेषे वेधः
विशेषः स्कांदे ॥ नागो द्वादशनाडीभिर्दिक् पंचदशभिस्तथा ॥ भूतो ष्टादशनाडीभिर्
दूषयंत्युत्तरां तिथिं ॥ अयं चोपवासातिरिक्तविषय इति वक्ष्यते ॥ इति वेधः ॥ तत्र
सर्वा तिथिर्दैव कर्मकालव्यापिनी सैव ग्राह्या ॥ कर्मणो यस्य यः कालस्तत्काल
व्यापिनी तिथिः ॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति विष्णुधर्मोक्तेः ॥ दिन
द्वये तद्व्याप्तावव्याप्तौ वैकदेशव्याप्तौ वा युग्मवाक्यान्निर्णयः ॥ तस्य पूर्वाबाधेनोप
पत्तेः ॥ युग्मवाक्यं तु ॥ युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः ॥ रुद्रेण द्वादशी यु
क्ता चतुर्दश्या च पूर्णिमा ॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं ॥ एतद्व्यस्तं
महादोषं हंति पुण्यं पुराकृतमिति ॥ अत्र रंध्रांताः शब्दा द्वितीयादिनवम्यंतति
थिवाचकाः ॥ रुद्र एकादशी ॥ द्वितीया तृतीयायुता सा च द्वितीयायुतेति सर्वयुग्मा
नीत्यर्थः ॥ इदं च शुक्लपक्षे ॥ अमाप्रतिपदोर्दर्शस्य पूर्णिमायाश्च तत्रैव सत्वाद्दि
ति केचित् ॥ तत्त्वं त्वमाप्रतिपदोः कृष्णपक्षे निगमात्पक्षद्वयपरमिदं ॥ तत्र
विशेषवाक्यैः सर्वतिथिविशेषोऽपोद्यते ॥ दशमी त्वन्यत्र पुराणसमुच्चये ॥ संपूर्णे शिवः १२

ष्ट दशमी कार्या मिश्रिता पूर्वयाथवेति ॥ संपूर्णेऽप्येकपक्षे ॥ त्रयोदशी तु सुमंतुनोक्ता ॥
त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने इति ॥ शुक्लपक्षे त्वापस्तंबः ॥ प्रतिपत्सद्वि
तीयास्याद्द्वितीया प्रतिपद्युता ॥ चतुर्थी संयुता या च सा तृतीया च फलप्रदा ॥ पं
चमी च प्रकर्तव्या षष्ठ्या युक्ता च नारद ॥ शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पू
र्वविद्धा प्रकर्तव्या परविद्धा न कुत्रचित् ॥ दशमी च प्रकर्तव्या सदुर्गा द्विजसत्तम ॥
षष्ठ्यष्टमी अमावास्या शुक्लपक्षे त्रयोदशी ॥ एताः परयुताः पूज्याः पराः पूर्वेण संयु
ता इति ॥ यत्तु व्याघ्रः ॥ खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं ॥ खर्वदर्पौ परौ
पूज्यौ हिंसा स्यात्पूर्वकालिकीति ॥ खर्वः साम्यं दर्पो वृद्धिः तयोः परा ॥ हिंसा क्षयस्त
त्र पूर्वेत्यर्थः ॥ एतच्च श्राद्धादिविषयं ॥ द्वितीयादिषु युग्मानां पूज्यता नियमादिषु ॥ ए
कोद्दिष्टादिके पार्वे ह्रासवृद्ध्यादिचोदनेति व्यासोक्तेः ॥ नियमादिषु व्रतदाना
दिदैवकर्मसु ॥ एकोद्दिष्टादिति पैतृकादावित्यर्थः ॥ कर्मकालव्याप्त्यभावे तु क
र्मोपक्रमकाले ग्राह्या ॥ कर्मोपक्रमकाले वर्तते तिथिर्ग्राह्या न युग्मादर
इति दीपिकोक्तेः ॥ यां तिथिं समनुप्राप्य उदयं याति भास्करः ॥ सा तिथिः
सकला ज्ञेया दानाध्ययनकर्मसु इत्यादीनि तानि त्रिमुहूर्तादिरुक्तिरिति निर्ण

यशोधी॥ ॥अथैकभक्तं॥ ॥तत्कालस्तु पाद्मे॥ मध्याह्नव्यापिनी ग्राह्या एकभ
क्ते सदा तिथिरिति॥ मध्याह्नश्च पंचधा विभक्तदिनस्य तृतीयांशः॥ तेन यद्यपि पाद
शदंडानंतरं प्राप्यते॥ तथापि दिनार्द्धसमयेतीते भुज्यते नियमेन यत्॥ एकभक्त
मिति प्रोक्तमतस्तस्याद्दिवैव हीति स्कांदोक्तेः॥ षोडशसप्तदशदंडेषु मुख्यः कालः॥
दीपिकायां तु॥ मध्याह्नात्परत ऊर्ध्वं त्रिनागदिवसस्यादेकभक्तमिति॥ ततः सूर्योदया
स्तपर्यंतं गौणः॥ दिवैव हीत्यस्य वैयर्थ्यापत्तेः तत्परत्वात्॥ अत्र पूर्वेद्युरेव व्याप्तिः प
रेद्युरेव व्याप्तिस्तदा तावांशव्याप्तिस्तत्रापि साम्यं वैषम्यं चेति षट्पक्षाः॥ त
त्राद्ययोरसंदेह एव॥ तृतीये तु पूर्वैव गौणमुख्यव्याप्तेः सत्वात् पूर्वेति माधवः॥ यु
ग्मवाक्यान्निर्णय इति हेमाद्रिः॥ चतुर्थपक्षे पूर्वैव॥ गौणकालव्याप्तेः सत्वात्॥ वैष
म्येणांशव्याप्तौ याधिका सा ग्राह्येति॥ साम्ये पूर्वा॥ अयं च स्वतंत्रैकभक्ते निर्णयः॥
अन्यांगे तूपवासप्रतिनिधौ तदनुसारेण निर्णयः॥ ॥अथ नक्तनिर्णयः॥ ॥
तच्च दिनानशनपूर्वं रात्रिभोजनं॥ तत्र प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदे
ति वत्सोक्तेः॥ प्रदोषस्तु॥ त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सति॥ नक्तं तत्र प्र शिवः
कर्तव्यमिति शास्त्रविनिश्चय इति मदनरत्ने व्यासोक्तेः॥ तत्रापि त्रिदंडोत्तरं कार्यं॥ १३

सायंसंध्या त्रिघटिका अस्तादुपरि भास्वतः इति स्कांदोक्तेर्दंडत्रयस्य संध्यात्वात् तत्र चत्वा
रि कर्माणि संध्यायां परिवर्जयेत्। आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति मा
र्कंडेयेन भोजननिषेधात्। मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः। नक्षत्रदर्शनान्न
क्तमहं मन्ये गणाधिपेति माधवीये भविष्योक्तेश्च। गौडास्तु॥ प्रदोषोस्तमयादूर्ध्वं घटिका
द्वयमिष्यते इति वत्सोक्तेः। प्रदोषः संध्या च दिनरात्र्योः संधौ मुहूर्तः। अर्द्धास्तमयात् संध्या
यत्नीभूतानतारका यावत्। तेजःपरिहानिवशाद्भानोरर्द्धोदयं यावदिति वर... रित्या
च। तन्न। अस्य संध्यावंदनाद्यध्यायादिपरत्वात्। अतएव चतुरखंडमंडलस्य संध्यात्वमुक्तं
विज्ञानेश्वरेण यच्च मदनरत्ने। नक्तस्यैव धत्वा प्राग्ग्रासभोजनगोचरायं निषेध इत्युक्तं
तन्न विधेर्निषेधाविरोधात्। अन्यथा कपिंजलानित्यत्र विन्योः धिकानां हिंसनं न स्या
त्। सायंकालेन नक्तं तु दिनद्वये प्रदोषास्पर्शे ज्ञेयं। अतएव परत्र स्याद्दस्तादर्वाग्य
तो द्विसेत्ति जाबालिवचनात्। प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते। आत्मनो द्वि
गुणा छाया मंदीभवति भास्करे तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनमिति स्कांदो
क्तेश्च यत्याद्यनामपि स्याप्येन नक्तं। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च वि
धवा चैव कुर्यात्सदिवाकरमिति तत्रैव स्मृत्यंतरात्। इदं मम पुत्रविधुरोपलक्षणं॥ ॥

पुत्रवतस्तु रात्रावेव। अनाश्रमी यः अग्नी स्यादपत्नीकोपि पुत्रवानिति संग्रहोक्तेः। सौर
नक्तं तु दिवैव। त्रिमुहूर्तं स्पृगेवाह्नि निशि चैतावती तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव
तु भोजनमिति सुमन्तूक्तेः। एकभक्ते विशेषः कालादर्शे स्कांदे। उदयस्था सदा पूज्या हरिदिन
क्रव्रते तिथिरिति। अन्यन्नक्तं तु संध्यायां दिवापि रात्रावेव। निषेधस्य रागप्राप्तभोजनगोच
रत्वेन वैधाबाधकत्वात्। दिनद्वयव्याप्तौ परा। उभयोर्यदि वा तिथ्योः प्रदोषव्यापिनी तिथिः।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यत इति कालादर्शे जाबालिवचनात्। अन्यपक्षे तु एक
नक्तवन्निर्णयः। अत्र विशेषो मदनरत्ने गारुडे। हविष्यभोजनं स्नानं सत्यमाहारलाघवं।
अग्निकार्यमधःशय्यां नक्तभोजी षडाचरेत्। अग्निकार्यं व्याहृतिहोमः॥ ॥इति नक्तं॥ ॥
अयाचिते तु विशेषवचनाभावादुपवासवन्निर्णयः॥ ॥अथ नक्षत्रव्रतकालः॥ ॥
विष्णुधर्मे उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः। श्रूयते यच्च बाला तारा निशि पंचाशिनासहेति। त्रि वा
माधवीये स्कांदे। तत्रैवोपवसेत्तस्मिन्येयन्निशि यादधो न वेला उपवासे यदा तस्या ऋद्धि
नक्षैकभक्तयोः॥ ॥अथ व्रतपरिभाषा॥ तत्राधिकारिणो मदनरत्ने भविष्ये। अनग्न ॥२५॥
यस्तु ये विप्रास्तेषां श्रेयो विधीयते। व्रतोपवासनियमैर्नानादानैस्तथा नृप। अनग्निय
त्रामुपवासविषयं। अत एव देवलः। आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः। अश्नंत एव

सिध्यंति नैषां सिद्धिरनश्नतां। एकादश्यादौ तु वचनाद्भवतीति विद्यामाः। शूद्रस्याप्यधिकारः॥
शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति। वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति व्यासो
क्तेः॥ प्राच्यास्तु वैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधः। वैश्याः शूद्राश्च ये मोहादुपवासं प्र
कुर्वते। त्रिरात्रं पंचरात्रं वा तेषां पुष्टिर्न विद्यत इति वचनादित्याहुः॥ यावदुक्तनिषेध स्त्र
न्यो। तत्त्वं तु निर्णयेन मे वर्तिता एवं स्त्रीणामपि। यत्तु स्कांदे। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपो
षणं। भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति हि। यद्देवानां यतिप्रणां च नक्षत्रकार्यादर्शान्य
र्चनं चातिथीनां। तस्याप्यर्थं सर्वदानन्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैव। आदित्यपुराणे। नारी
खल्वननुज्ञाता भर्त्रा चापि सुतेन वा। विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदैहिकमिति। और्ध्व
दैहिकं पारलौकिकं। तदेतत्सर्वं भर्त्रननुज्ञाविषयं। भार्या पत्यकर्मते नि च व्रतादीन्याचरे
दिति कात्यायनोक्तेः। अत्र विशेषो हरिवंशे। स्नानं च कार्यं शिरसस्ततः फलमवाप्नुयात्।
स्नात्वा सर्वा प्रातरुत्थाय पतिं विज्ञापयेत्सती॥ तथा गृहीत्वोदुंबरं पात्रं सा दत्तं सक्षतं तथा।
गोशृंगं दक्षिणं सिंच पुण्यगृह्णीयाज्जलं जलं। औदुंबरं ताम्रमयं ततो भर्तुः सती दद्यात्स्नातस्य
प्रयतस्य च। आत्मनश्चाभिषेकव्यं ततः शिरसि तज्जलं। उपवासेषु कर्तव्यमेतद्धि व्रतकेषु
चेति। सर्वव्रते संकल्पविधिर्भारते। गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु

इत्तोनैवेत्यर्थः॥१

पक्षीयाद्यद्वासंकल्पयेद्बुधः॥ ॥अथव्रतारंभकालः॥ ॥मदनरत्ने गार्ग्यः॥ अस्तगे च गु
रौ शुक्रे बाले वृद्धे मलिम्लुचे। उद्यापनमुपारंभं व्रतानां नैव कारयेत्॥ रत्नमालायां॥ सोम
सौम्यगुरुशुक्रवासराः सर्वकर्मसु भवंति सिद्धिदाः॥ भानुभौमशनिवासरेषु च प्रोक्तमेव खलु
खलु कर्म सिध्यति॥ तथा॥ विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः खलु पादआद्यः॥ सवैधृतिस्तु
व्यतिपातनामा सर्वोऽप्यनिष्टः परिघस्य चार्द्धं॥ विष्कंभयोगे प्रथमेस्त नाड्यो व्याघातयोगे नव पं
च शूले। गंडे तिगंडे च षडेव नाड्यः शुभेषु कार्येषु विवर्जनीयाः॥ संग्रहे॥ सक्रोःग्नि द्विवायोरूर्द्ध्वं स
प्तमी। भद्रयोरधः। शुक्रवेदेशयोरूर्द्ध्वं भद्रा प्राग्वसुपूर्णयोः॥ श्रीपतिः॥ न सिद्धिमायाति कृतं च
विष्ट्यां विषारिघातादिकमत्र सिद्धं॥ व्यवहारसमुच्चये दशम्यामष्टम्यां प्रथमघटिकापंच
कपरं हरिघ्नः सप्तम्यां द्विदशघटिकांते त्रिघटिकं तृतीयाराकायां स्वयमष्ट घटिकाभ्यः परत्र वं
अनं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमात्तत्रैव सार्पलीं सुसितपक्षे लक्षे चैव तु च पिर्केः॥
सर्पिण्यास्तु मुखं त्याज्यं वृश्चिकाः पुच्छमेव च॥ माधवीये॥ विष्टिर्यदा त्वन्तिचेत्परार्द्धजाता शिवः
पूर्वार्द्धजा निशि तदा शुभदा च पुच्छे॥ ब्रह्मयामले॥ दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा॥
न त्याज्या शुभकार्येषु प्राहुरेवं पुरातनाः॥ व्रतारंभे च विशेषो मदनरत्ने सत्यव्रतेनोक्तः॥ ॥१५॥
उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक्। सा खंडा न व्रतानां स्यादारंभश्च समापनमि

ति॥ दिवसः॥ अनुत्वा प्रातराहारं स्नात्वाचम्य समाहितः॥ सूर्याय देवताभ्यश्च नि
वेद्य व्रतमाचरेत्॥ मदनरत्ने भविष्ये॥ क्षमा सत्यं दया दानं शौचमिंद्रियनिग्र
हः॥ देवपूजाग्निहवनं संतोषस्तेयवर्जनं॥ सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृ
तः॥ कौर्मे॥ बहिर्ग्रामांत्यजान्सूतिं पतितं च रजस्वलां॥ न स्पृशेन्नाभिभाषेत नेक्षे
त व्रतवासरे॥ विष्णुधर्मे॥ तत्काप्यजपनध्यानतत्कथाश्रवणादिकं॥ तदर्चनं च तत्
न्नामकीर्तनश्रवणादिकं॥ उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः॥ अग्निहोम
स्तद्दैवत्यः व्याहृतिहोमो वेति वर्द्धमानः॥ यत्तु तेनोक्तं सर्वपदमेतत्पुराणोक्तप्र
क्षतव्रतपरं॥ व्रतांतरे तु विध्यंतरसत्त्वे होमो न्यथा न॥ अत एवैकादश्यां शिष्टानां
होमानाचरणमिति॥ तन्न॥ जपो होमश्चेति वक्ष्यमाणस्यैकवाक्यत्वेनास्य काम्य
व्रतसमाप्तिपरत्वात्॥ तत्त्वं तु सासदशस्य पद्ममिश्रविदांश्चि द्विप्रकरणस्थेनैव
तन्न कृतविशेषहोमविधिर्निरस्यो पसंहार इति॥ षष्ठीचंद्रोदये भविष्यपुराणे॥ स्ना
त्वा व्रतवता सर्वव्रतेषु व्रतमूर्त्तयः॥ पूज्याः सुवर्णमय्याद्याः शक्त्या वेश्मनि शा
यिना॥ जपो होमश्च सामान्यं व्रतांते दानमेव च॥ चतुर्विंश द्वादश वा पंच वा त्र
य एव वा॥ विप्राः पूज्या यथाशक्ति तेभ्यो दद्याच्च दक्षिणां॥ अत्र विप्रा इति त्रिं

ग निर्देशात्तु मांस एव नोज्यान्नतु क्षियः॥ एवं सहस्रभोजनादावपि॥ विरूपैक
शेषस्य प्रमाणांतरं विनाप्ययुक्तत्वात्॥ अत एव द्वयोर्यजमानयोः प्रतिपदं कुर्याद्वद्ध
या यजमानस्य इत्यादौ विरूपैकशेषाप्रयोगात्॥ पत्न्याश्चित्रा प्राप्यं वक्तृत्वं वानसं न व
तीन्क्रमाचार्यैः पार्थसारथिनाच॥ एतेनैकस्य ब्राह्मणस्य द्वयोः भोजनं परास्तं॥
वक्तृत्वस्यैकपदश्रुत्या ब्राह्मणान्वितत्वेन भोजनान्वयानावादित्यन्यत्र विस्तरः॥
शूद्रस्यतु प्रतिष्ठादि वह्निमुखाराव्याहृति होम इति वर्द्धमानः॥ व्रतमस्तु यो व्रत
देवता प्रतिमा॥ प्रतिमास्वरूपं च मदनरत्नेन्नविष्ये॥ अनुक्तद्रव्यतंत्रं त्या देवताप्र
तिमा न्यपा॥ सौवर्णी राजती ताम्री वह्निजा मार्त्तिकी तथा॥ चित्रजापिष्टलेखाचा निज
वित्तानुसारतः॥ आमाषात्पलपर्यंतं कर्त्तव्या शाठ्यवर्जितैः॥ तत्रैव ब्राह्मे॥ आज्यं प्र
थमनादेशेतु होतिष्ठ विधीयते॥ मंत्रस्य देवतायाश्च प्रजापतिरितिस्थितिः॥ व्रतो
द्यापनानुक्तौ तु पृथ्वीचंद्रोदये नंदिपुराणे॥ कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरि
तं॥ उद्यापनं विना यत्तु कृतं तन्निःफलं भवेत्॥ यदि चोद्यापनं नोक्तं व्रतानुगुणा शिवः
त्समाचरेत्॥ वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते॥ गां श्चैवकांचनं दद्याद्व्रतस्य प
रिपूर्त्तये॥ अशक्तौ तु नारदीये॥ सर्वेषामप्यलाभे तु यथोक्तकरणं विना॥ विप्र १६

वाक्यं स्मृतं पुण्यं व्रतस्य परिपूर्त्तये॥ वृथा विप्रवचो यस्तु कुरुते मनुजाधमः॥ अद
त्वा दक्षिणां पापः स याति नरकं ध्रुवं॥ भारते॥ वेदोपनिषदे चैव सर्वकर्मसु दक्षि
णा॥ सर्वत्रैव मयोद्दिष्टा भूमिर्गावोऽथ काञ्चनं॥ वैजवापः॥ शिवनेत्रोद्भवं यस्मात्प्रज
तं पितृवल्लभं॥ अमंगलं तद्यत्नेन देवकार्येषु वर्जयेत्॥ टोडरानंदे देवीपुराणे॥ व्र
ते च तीर्थेऽध्ययने श्राद्धेपि च विशेषतः॥ परान्नभोजनाद्देवि यस्यान्नं तस्य तत्फलं॥
पृथ्वीचंद्रोदये भविष्यपुराणे॥ नित्यस्नायी मिताहारो गुरुदेवद्विजार्चकः॥ क्षारं क्षौद्रं च
लवणं मधु मांसानि वर्जयेत्॥ क्षारास्तु तत्रैवोक्ताः॥ तिलमुद्गादृते शैब्यं सस्यं गोधू
मकोद्रवौ॥ धान्यकं देवधान्यं च शमीधान्यं तथैव च॥ खिन्नधान्यं तथा पण्यं मूलं क्षा
रगणः स्मृतः॥ गोधूमानां तु तत्रैव प्रतिप्रसवः॥ व्रीहिषष्टिकमुद्गाश्च कलायाः स
लिलं पयः॥ श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः॥ कूष्माण्डालाबुवार्त्ताक
पालंकीं ज्योत्स्निकां त्यजेत्॥ चरुभैक्षं सक्तुकणाः शाकं दधि घृतं मधु॥ श्यामाकाः
शालिनीवारा यावकं मूलतंडुलं॥ हविष्यव्रतनक्तादावग्निकार्यादिके हितं॥ मधु
मांसे विहायान्यद्व्रते वा हितमीरितं मिति॥ शमीधान्यं माषादि॥ पालंकी मध्य
देशे योई इति प्रसिद्धा॥ ज्योत्स्निका कोशातकी॥ मिताहारायां गौतमः॥ चरुभै

हासक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्ता
नि॥ पयोदधिघृतं च गव्यमिति॥ अन्यच्च विशेषः एकादशीचातुर्मास्यादिप्रकरणे
वक्ष्यते॥ गृहीतत्यागे तु मदने छागलेयः॥ एवं व्रतं गृहीत्वा यो न चरेत्काममोहितः॥
जीवन्भवति चांडालो मृतः श्वा चाभिजायते॥ तत्र प्रायश्चित्तमुक्तं पृथ्वीचंद्रोदये
लिंगपुराणे॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि॥ दिनत्रयं न भुंजी
त मुंडनं शिरसोथवेति॥ प्रायश्चित्ताम्नानादतिक्रांतव्रतानुष्ठानं नास्तीति गम्यते॥
अतिक्रांतमपि व्रतं कार्यमेवेति शूलपाणिः॥ एतच्चाशक्तविषयं॥ अशक्तौ तु का
हेमाद्रौ पुराणांतरे॥ उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत्॥ तावद्धना दि वा दद्या
द्यद्भक्ताद्द्विगुणं तथा॥ सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्॥ कुर्याद्द्वादशसं
ख्याकान्यथाशक्त्याथवा नरः इति॥ मदनरत्ने वायवीये॥ द्रव्यदातोपवासस्य फ
लं प्राप्नोत्यसंशयं॥ तथापरार्के देवलः॥ ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं॥
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः॥ मात्स्ये॥ तस्माद्व्रतोपवासेन स्ना
नमभ्यंगपूर्वकं॥ वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप॥ अन्ये च नियमास्तत्र त शिवः
त्रान्वेषणीयाः॥ ॥अथ स्त्रीव्रतेषु विशेष उच्यते॥ ॥तत्र हेमाद्रौ व्रतकांडे १९

गारुडे॥ गंधालंकारतांबूलपुष्पमालानुलेपनं॥ उपवासेन दुष्येत दंतधाव
नमंजनमिति॥ इदं च सभर्तृकोपवासविषयं॥ अंजनं च सतांबूलं कुंकुमं
रक्तवाससी॥ धारयेत्सोपवासापि अवैधव्यकरं यतः॥ विधवा याति मार्गेण कु
मारी वा यदृच्छया इति तत्रैव वचनविष्णूक्तेः॥ तथा विष्णुधर्मे॥ सर्वेष्वेवोपवासेषु पु
मान्नारी वा यशस्विनी॥ धारयेद्रक्तवस्त्राणि कुंकुमानि सितानि च॥ विधवा
र शुक्लवसनमेकमेव हि धारयेत्॥ मनुरपि॥ पुष्पालंकारवस्त्राणि गंधधूपानु
लेपनं॥ उपवासे न दुष्यंति दंतधावनमंजनं॥ मदनरत्ने व्यासः॥ दंतधाव
नपुष्पादि व्रते पत्यस्य न दुष्यतीति॥ यद्यपीदं सर्वोपवासविषयं प्रतीयते॥
तथापि शिष्टाचारात्सौभाग्याद्यर्थं क्रियमाणनवरात्रत्रिरात्राद्युपवासवि
षयमेव॥ नत्वेकादश्यादिविषयं॥ असकृज्जलपानाच्च सकृत्तांबूलचर्वणा
त्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ इति अपरार्के देवलेना
तन्निषेधात्॥ न चास्य पुंविषयत्वेन सावकाशत्वात्स्त्रीणां तांबूलादिप्रा
प्तीति वाच्यं॥ तांबूलादिप्राप्तस्यैवैकादशीतरविषयत्वेनैवपरीत्य

स्यापि सुवचत्वात्॥ यत्तु हरिवंशे॥ अंजनं रोचनं चैव गंधान्सुमनसस्तथा॥
व्रते चैवोपवासे च नित्यमेव विवर्जयेत्॥ शिरसाभ्यंजनं सौम्यैनैवमेतत्प्रश-
स्यते॥ न पादयोर्न गात्रस्य स्नेहनेति स्थितिः स्मृतेति॥ तत्तैलाभ्यंगपरं पाक-
तविषयं न तु सर्वघृतादौ विरोधादिति मदनरत्ने उक्तं॥ तत्रैव॥ असकृज्जलपा-
नाद्दोषश्च कलहस्य च तिस्तथा॥ उपवासो हतो ह्यपि सद्यो भ्रंशयति स्त्रि-
यं॥ स्त्रियमित्युपलक्षणं॥ मदनरत्ने शिवधर्मे॥ दानं व्रतानि नियमा ज्ञानं
ध्यानं हुतं जपः॥ यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत्॥ ॥अथ सू-
तकादौ निर्णयः॥ ॥तत्र शावसूत्याशौचयोः सर्वस्मार्तकर्मनिवृत्तिर्निब-
ंधेषु स्पष्टैव॥ गौडास्तु॥ होताशौचाद्यपिता माकु॥ जातर्द्धे तल्लेशोतानि-
त्यकर्म न चाचरेत्॥ नैमित्तिकं च तदधः प्रवक्ष्ये न चाचरेत्॥ जातके च
समुत्पन्ने ज्वरकर्मणि मैथुने॥ धूमोद्गारे तथा वांते नित्यकर्माणि संत्यजेत्॥
द्रव्येषु के त्वजीर्णे च नैव लुप्तापि किंचन॥ कर्मकुर्यान्नरो नित्यं सूतके मृतके शिवः
केतयेति कालिकापुराणात्॥ वस्तुतस्तु पूर्वदेवीहृदोपक्रमात्तन्मात्रविष १८

५ शुद्धिलत्वैव विस्तु॥ बहुकालिकसंकल्पो गृहीतश्च पुरा यदि॥ सूतके मृतके चैव व्रतं तन्नैव
दुष्यति॥ एतत्काम्यपरं॥ नित्यं त्वनारब्धमपि कार्यमिति गौडाः॥ ५

यमस्येति युक्तं प्रतीमः॥ तथा हेमाद्रौ पाद्मे॥ गर्भिणी सूतिका रिक्ता कुमारी वाथ
रोगिणी॥ यदाऽशुद्धा तदान्येन कारयेत्प्रयता स्वयमिति॥ पुंसोप्येष विधिः॥ जैम
विवर्हितत्वात्॥ तेन यस्मिन्व्रते यत्पूजनादिकं तदन्येन कारयेत्॥ शारीरनियमा-
न्स्वयं कुर्यादिति हेमाद्रिर्माधवश्च॥ न व्रतिनां व्रते इति विस्तरेके श्च॥ आरंभस्त-
त्रवत्येव॥ मदनरत्ने॥ पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः॥ तत्कर्तव्यं नरैः
शुद्धं दानार्चनविवर्जितं॥ माधवीये कौर्मे॥ काम्योपवासे प्रक्रांते त्वंतरा मृतसू-
तके॥ तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति॥ एतेन सांगे धिकारात्कृतां
गदेवपूजादि कार्यमिति वदंतो मानेक्तिः परास्ता॥ नवरात्रे तु तत्रैव विशेषं वक्ष्या-
मः॥ एवं रजस्वलापि॥ यत्तु सत्यव्रतः॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भवे-
त्॥ न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति॥ तत्प्रतिनिधिना कारयेदित्ये-
तत्परं॥ तदुक्तं मदनरत्ने मात्स्ये॥ अंतरा तु रजोयोगे पूजामन्येन कारयेत्॥ प्र-
तिनिधयश्च॥ निर्णयामृते पैठीनसिः॥ नार्यपत्यं व्रतं कुर्याद्भार्याया अपि पति
व्रतं॥ असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते॥ स्कांदेपि॥ पुत्रं वा विनया-
पतं भ्रातरं भगिनीं तथा॥ एषामभाव एवान्यं ब्राह्मणं वा नियोजयेत्॥ कात्या

९ यद्यपि उपवासो व्रतं होमस्तीर्थस्नानजपादिकमिति श्रवद्दिपाठस्तथापि स एव दोषः ... प्त
पतनानि षड् इति मानवीयजपनिषेधात्॥ ९

यनः॥ पितृमातृभ्रातृपतिगुर्वर्थं च विशेषतः॥ उपवासं प्रकुर्वाणः पुण्यं शतगुणं
लभेत्॥ मातामहादीनुद्दिश्य एकादश्यामुपोषणे॥ तत्तेभ्यः फलं विप्राः समग्रं सम
वाप्नुयुः॥ मदनरत्ने प्रभासखंडे॥ नार्या पुत्रः पुरोधाश्च भ्राता पत्नी सखापि च॥ या
त्रायां देवकार्ये च जायंते प्रतिहस्तकाः॥ पत्निः सुतं महादेवि स्वयमेव व्रतं नेत्यादि॥
तत्रैव वायवीये॥ स्वयं कर्तुमशक्तश्चेत्कारयीत पुरोधसा॥ इदं च सर्ववर्णसाधार
णं॥ अविशेषात्॥ यत्तु कश्चिन्महोहश्चाह॥ शूद्रस्य ब्राह्मणादिरेव प्रतिनिधिर्युक्तो
न शूद्रः॥ उपस्तापस्तीर्थसेवा प्रव्रज्या मंत्रसाधनं॥ विप्रैः संपादितं यस्य संपन्नं
तस्य तत्फलमिति मरीचिवचनादिति॥ तन्न॥ प्रव्रज्यादीनां शूद्रं प्रत्यसंभवाद्विषये
ऽपायदर्शनादिति न्यायेनास्य ब्राह्मणादिगोचरत्वात्॥ वस्तुतस्तु संशृणुता वच
नमात्रमत्रोच्यत इति प्रतिनिधेः कावार्तेत्यलं॥ अत्र विशेषमाह त्रिकांडमंडनः॥
काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके तु सः॥ काम्येप्युपक्रमादूर्ध्वं केचित्प्रतिनिं
धिं विदुः॥ न स्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु॥ स देशकालयोर्नास्ति ना
रणेरग्निरेव सः॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥ हिरण्यकेशिसूत्रे शिवः
पि॥ न स्वामित्वस्य नार्यायाः पुत्रस्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः शब्दस्य १९

च प्रतिनिधिर्विद्यत इति॥ ॥अथ व्रतादिसन्निपाते निर्णयः॥ ॥तत्र ति
थिद्वयसन्निपाते तंत्रेणैकेन दानहोमादिक्रमेणानुष्ठेयं॥ अविरोधात्॥ इदं चाविरो
धेव॥ एकमध्येन्यकाम्यं कर्मारंभस्तु नन्तवत्येन गुणफलादते॥ यस्य यज्ञे व्रतं तेन म
नायज्ञस्तायते तं यज्ञं निर्ऋतिर्गच्छतीति शाणकधृतस्मृतेः॥ यज्ञव्रतादिकर्ममात्रे॥
अनंगेन व्यवधाने दोषस्य सर्वत्र साम्यात्॥ शिष्टास्तु माघकार्तिकस्नानादिमध्ये
पुत्रजन्महोमं चूलान्नारं तथ्रवणाद्याचरंति॥ तन्नित्यमध्ये स्तु॥ काम्यव्रतमध्ये तु चिं
त्यं॥ यत्र तु नैकेनैकतंत्रादौ विरोधस्तत्र प्राधान्याद्बेकमेवैकं कार्यं॥ न चेत्परेद्यु
स्तन्नियोगेऽन्यकाले कार्यं॥ समकालीन विरुद्धव्रतादौ त्वेकं स्वयं कृत्वान्यदन्याद्वि
नाकारयेदिति माधवः॥ यत्र तु शिवरात्र्यादौ तिथिमध्ये पारणयाद्दिवाभोजनं प्राप्तं॥
कृताष्टम्यादिं दिवा तु स्वा रात्रौ तु स्वा च पर्वणि॥ एकादश्यामहोरात्रं भुक्त्वा चांद्राय
णं चरेदिति तन्निषेधश्च॥ तत्र पारणाया वैधत्वाद्दिवा भोजनं॥ निषेधस्तु राग
प्राप्तभोजनविषयः॥ एवमष्टम्यादिनक्तव्रते संक्रांत्यादौ रवौ संकष्टचतुर्थ्यां च
रात्रौ भोजनं॥ यत्र त्वष्टम्यादौ दिवा तु भोजननिषेधः संक्रमे च रात्रावपीति निषेधद्व
यं तत्रोपवास एव कार्यः॥ यच्चापि पुत्रिणः उपवासोपि निषिद्धस्तथाप्यपत्ना

सनिषेधे त्वत्र हर्य्यां कैश्चित्रकल्प्येदितिवचनात्। कैश्चिद्गृहयिलोपवासः का
चांद्रायणमध्ये एकादश्यादौ भोजनं कार्यमेव। चांद्रायणस्य काम्यत्वेन नित्य
बाधकत्वात्। अथवा ग्रासेन गत्यंतरसंभवाच्च। एकादश्यामेकांतरोपवासादिपा
रणायां जलपारणां कृत्वोपवसेत्। अपोऽश्नितमनशितं चेति श्रुतेः। एवं द्वाद
श्यां मासोपवास श्राद्ध प्रदोषादिष्वूह्येयं। एवं काम्यनैमित्तिकनित्यत्वादिरूहतं बला
बलं स्वयमूह्यमिति दिक्॥ ॥इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ परिन्ना
षा समाप्ता॥ ॥अथ प्रतिपदादितिथयः॥ ॥शुक्लप्रतिपदपराह्णव्यापि
नी सर्वा ग्राह्या। युग्मवाक्यात्। प्रतिपत्संमुखी कार्या या भवेदापराह्णिकीति स्कांदो
क्तेः। शुक्लास्यात्प्रतिपत्तिथिः प्रथमतश्च सापराह्णेन वेदिति दीपिकोक्तेश्च। अ
पराह्णश्च पंचधा विभक्ते दिने चतुर्थो भागः। तदभावे सायाह्नव्यापिनी ग्राह्या। त
दभावे तु सायाह्नव्यापिनी परिगृह्यतामिति माधवोक्तेः। कृष्णा तु परा। कृष्णाप्र
तरतोऽखिलेति दीपिकोक्तेः। कृष्णापि पूर्वैवेत्यनंतभट्टः। सर्वतिथिषु वर्ज्यानि त्रिवः
कानि मुहूर्तदीपिकायां। कूष्मांडं बृहतीफलानि धवलं वर्ज्यं तिलाम्लं तथा तै
लं चामलकं दिवं प्रवसतां शीर्षं कपालांत्रकं। निष्पावांश्च मसूरिकां फल २०

मद्यं रंताकसंज्ञं मधुघृतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेवमाषोडश्या। शीर्षं नालिकेरं। कपालं
अलाबु। अंत्रं पटोलं। भूपालः। कूष्मांडं बृहती क्षारं मूलकं पनसं फलं। धात्री शिरः कपालं
अंत्रं नखचर्मतिलानि च। क्षुरकर्मांगनासेवां प्रतिपत्सु न तिसजेत्। नखं शिंबी। चर्म मसूरिका।
॥ ॥द्वितीया तु शुक्ला पूर्वा शुक्लोत्तरेति हेमाद्रिः। द्वितीयादिमा एवांक्तियदिसामितानुपम
तः सर्वेति दीपिकोक्तेः। माधवानंतभट्टमते तु सर्वापि द्वितीया परा। तथा च माधवः। पूर्वेद्युरस
ती प्रातः परेद्युस्त्रिमुहूर्त्तगा। सा द्वितीया परा ज्ञेया पूर्वविद्धा ततोऽन्यथेति॥ ॥तृतीया तु सर्वमते
रंभाव्यतिरिक्ता परैव। सिनयुग्मवाक्यात्। रंभाव्रतविषयां रंभाख्यां वर्जयित्वा तु तृतीयां मुनिसत्तम।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते इति ब्रह्मवैवर्तात्। गौरीव्रते तु विशेषमाह माधवः। मुहूर्त्त
मात्रसत्वेऽपि दिने गौरीव्रतं परेद्युः शुद्धाधिकायां मध्ये वं गणयोगप्रशंसनादिति॥ ॥चतुर्थ्यपि स
र्वमते गणेशव्रतातिरिक्ता परैव। युग्मवाक्यात्। एकादशी तथा षष्ठी अमावास्या चतुर्थिका। उपोष्याः
परसंयुक्ताः पराः पूर्वेण संयुता इति माधवीये ब्रह्मवैवर्तोक्तेश्च। नागचतुर्थी च मध्याह्नव्यापि
नी पंचमीयुता च ग्राह्येति निर्णयामृते माधवीये चोक्तं। गणेशव्रते तु तृतीयायुक्तैव। चतुर्थी
तु तृतीयायां महापुण्यफलप्रदा। कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणीति ब्रह्मवैवर्ता
त्। माधवीये तु गणेशव्रतं मध्याह्नव्यापिनी मुख्या। चतुर्थी गणनाथस्य मातृविद्धा प्रशस्य

तो मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति बृहस्पतिवचनात्तत्प्रातः शुक्लतिथेः स्मृ
त्वा मध्याह्ने स्नात्वा पूजयेन्नृपेति तत्कर्मकालविधानाच्च ॥ तेन परदिने सत्वे परा अन्यथा पूर्वेत्य
र्कः । वस्तुतस्तु यत्र मासे शुक्ले चतुर्थी गणेशव्रतविशेषे मध्याह्नपूजोक्ता तद्विषयाण्ये
व प्रागुक्तवचनानि न तु सार्वत्रिकाणि । संकष्टचतुर्थ्यादौ बहूनां कालानां बाधापत्तेः । तेन
सर्वत्र गणेशव्रते पूर्वैवेति सिद्धं । संकष्टचतुर्थी तु चंद्रोदयव्यापिनी ग्राह्या । दिनद्वये सत्वे मा
योगस्य सत्वात्पूर्वेति केचित् । अन्ये तु दिनद्वये तृतीयादिरूपस्य प्रतीयायोगस्याभावात्प
रदिने माधवोक्तमध्याह्नव्याप्तिसत्वाच्च परेत्याचक्षते । दिनद्वये तु तदभावे परैव । गौरीव्र
ते पूर्वैव । गणेशगौरीबहुलाव्यतिरिक्ताः प्रकीर्तिताः । चतुर्थ्यः पंचमीविद्धा देवतान्तरयोगत
इति मदनरत्ने ब्रह्मवैवर्तोक्तेः ॥ ॥ पंचमी तु माधवमते सर्वापि पूर्वा । चतुर्थीसंयुता कार्या
पंचमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति हारीतोक्तेः । हेमाद्रिमते
तु कृष्णा पूर्वा सिता परा । कृष्णा पूर्वयुता सिता परयुता स्यात्पंचमी तिथिदीपिकोक्तेः । वस्तुतस्तु शिवः
हारीतोक्तिरुपवासविषया । प्रतिपत्पंचमी चैव सावित्री वटपूर्णिमा । नवमी दशमी चैव
नोपोष्याः परसंयुता इति ब्रह्मवैवर्तात्तत्र यत्तु । पंचमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारदेत्याप २१
स्तंबीयं तत्स्कंदव्रतपरं । स्कंदोपवासे त्वीकार्या पंचमी परसंयुते तिवाक्यशेषादिति माधवः ॥

नागपूजाविषयमित्यनंतभट्टनिर्णयामृतादयः । चमत्कारचिंतामणौ च । पंचमी नागपूजा
यां कार्या षष्ठीसमन्विता । तस्यां हि तुषिता नागा इतरा सचतुर्थिकेति । तेन नागपूजादौ परैव ॥
यत्तु मदनरत्ने दिवोदासीये । श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी । तां परित्यज्य पं
चम्यश्चतुर्थीसहिता हिता इति संग्रहोक्तेः गणेशस्कंदयोगाभ्यां क्रमान्नागाः शुभाशुभाः । मि
श्रित्वेतयोः पत्रे नागानामाखुवह्निरीणमिति षट्त्रिंशन्मताच्च श्रावणपंचम्यतिरिक्तायाः पंचम्याः
चतुर्थीयुतत्वमुक्तं तदुपवासादिविषयं । पत्रे चाहने ॥ ॥ षष्ठी सर्वमते स्कंदव्रतातिरिक्ता परैव
युग्मवाक्यात् । नागविद्धा न कर्तव्या षष्ठी चैव कदाचनेति स्कांदाच्च । निर्णयामृते षष्ठी च सप्तमी
चैव वारश्चेदंशुमालिनः । योगोऽयं पद्मको नाम सूर्यकोटिग्रहैः समः ॥ ॥ सप्तमी पूर्वैव युग्मवा
क्यात् । षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदेति स्कांदाच्च ॥ ॥ अष्टमी तु सर्वमते कृष्णा पूर्वा
सिता परा । व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परेति माधवोक्तेः ॥ परयुक्ता शुक्लाष्टमी पूर्वयुक्
तेति दीपिकोक्तेः । शिवशक्तिमहोत्सवे तु कृष्णाप्युत्तरा । पक्षद्वयेऽप्यष्टमी शिवशक्त्योर्महोत्सवे प्र
तिमाधवोक्तेः । दिवोदासीये न विद्धा । यदा यदा सिताष्टम्यां बुधवारो भवेन्नृप तदा तदा हि सा
या क्षयकरनक्षत्रानेनप । संध्याकाले तथा चैत्रे प्रसुप्ते च जनार्दने बुधाष्टमी न कर्तव्या हंति
पुण्यं पुराकृतं ॥ ॥ नवमी तु सर्वमते पूर्वा युग्मवाक्यात् ॥ न कुर्यान्नवमीं तात दशम्यां तु क

ग्वचनेति स्कांदात् दशमीतु सर्वापरा चेति हेमाद्रिः ॥ छायापर्वोत्तरा शुक्लादशम्येवं व्यवस्थि
तेति माधवः । वस्तुतस्तु मुख्या नवमीयुतैव ग्राह्या । दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्तमेत्या
पस्तंबोक्तेः ॥ यत्तु संपूर्णा दशमी कार्या पूर्वया परयाथ वेत्यंगिरसोक्तं तन्नवमीयुक्ताभावे अद
यिकी या ह्वेत्येवं नेयं ॥ ॥ अथैकादशी ॥ ॥ तत्रैकादशी द्विधा । निषेधपरिपालकी व्र नाव४
तरूपा च । तत्राद्यः ॥ न शंखेन पिबेत्तोयं न खादेत्कूर्मशूकरौ । एकादश्यां न भुंजीत पक्षयोरुभयो
रपीति कौर्मदेवयाज्ञिकः ॥ अग्निपुराणेपि गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च । एका
दश्यां न भुंजीत पक्षयोरुभयोरपीति । न चात्र पर्युदासेन व्रतविधिः तद्धेतुव्रतादिशब्दाना
वात् ॥ व्रतरूपस्तु ब्रह्मवैवर्ते । प्राशे हरिदिने सम्यग्विधाय नियमं निशि । दशम्यामुपवासस्य
प्रकुर्याद्वैष्णवं व्रतमिति । इदं च शिवभक्तादिभिरपि कार्यं । वैष्णवो वाथ शैवो वा कुर्यादेका
दशीव्रतमिति शिवधर्मोक्तेः । वैष्णवो वाथ शैवो वा सौरोप्येतत्समाचरेदिति सौरपुराणा
च्च ॥ सोपि द्विधा । नित्यः काम्यश्च । उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति गारुडोक्तेः । पक्षे शिवः
पक्षे च कर्तव्यमेकादश्यामुपोषणमिति नारदोक्तेश्च नित्यता । यदीच्छेद्विष्णुसायुज्यं श्रियं सं
ततिमात्मनः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति । कौर्मादिषु फलश्रुतेः काम्यता ॥ ॥२२॥
अन्ये एकादशीव्रतं च गृहस्थातिरिक्तानामेव नित्यं गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं न

कृष्णायां ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ वनस्थयतिधर्मोयं शुक्लामेव
सदा गृहीति देवलोक्तेः ॥ न चानेन निषेधपालनस्यैव वनस्थयतिविषये उप
संह्रियते न तु व्रतमिति वाच्यं ॥ अस्य पर्युदासेन व्रतविधिपरत्वात् ॥ अन्यथा ह्यु
क्ताग्निपुराणवचनेन निषेधपालने गृहस्थस्याधिकारात्तेन विरोधः स्यात् ॥ नि
षेधस्य निवृत्तिमात्रफलत्वेन विशेषानपेक्षणादुपसंहारायोगात् ॥ अत्राव
स्यधर्मत्वाभावाच्च ॥ तस्मादनेन न सर्वेषामेकादशीव्रतविधायिनां सामान्यवा
क्यानां वनस्थयतिविषये उपसंहारान्न गृहस्थस्य कृष्णायां नित्यव्रतप्राप्तिः ॥
कथं तर्हि ॥ संक्रांत्यामुपवासं च कृष्णैकादशीवासरे ॥ चंद्रसूर्यग्रहे चैव न कुर्या
त्पुत्रवान्गृही इति नारदादिवचनेन कृष्णानिषेधः प्राप्त्यभावादिति चेत् ॥ श्रूयतां ॥
शयिनी बोधिनी मध्ये या तु कृष्णैकादशी भवेत् ॥ सैवोपोष्या गृहस्थेन नान्या कृष्णा क
दाचनेति पाद्मे ॥ गृहस्थस्य आषाढीकार्त्तिकीमध्यस्थायां कृष्णा विहिता सा तु त्र
वतो निषिध्यते ॥ अन्यकृष्णायां तु न विधिः सर्वविधीनां वनस्थयत्युपसंहारा
त् ॥ न निषेधः प्राप्त्यभावात् ॥ शयन्यादिवाक्यं तु त्रगृहिगोचरमित्यनंतभ
ट्टहेमाद्र्यादिग्रंथात् ॥ दीपिकायां ॥ असिता तु शयिनीबोधांतरस्थाप्युपोष्या नान्या ।

सात्मजिनोपीति॥ मदनरत्नेपि विष्णुः॥ यथा शुक्ला तथा कृष्णा द्वादशी मे सदा प्रि-
या॥ श्रीकामगृहस्थैः कर्तव्या भोगसंतानवर्द्धिनी॥ कृष्णपक्षे निस्तया लक्षा नततेनोपद-
र्शितेति॥ निषेधपालनं काम्यव्रतं च सर्वं लक्ष्यायां सर्वगृहिणां न वत्यवा॥ पुत्रवा-
न्सनार्यश्च बंधुयुक्तस्तथैव च॥ उभयोः पक्षयोः काम्यव्रतं कुर्यात्तु वैष्णवमिति
नारदोक्तेः॥ एतच्च सर्वं कालादर्श उक्तं॥ विधवाया वनस्थस्य यतेश्चैकादशी द्वयो-
रुपवासोऽगृहस्थस्य शुक्लायामेव पुत्रिणः॥ कुले निषिधः कृष्णायां सिद्धिस्तस्य ततोऽक्ष-
तेरिति॥ प्राच्याः स्कंदे वैष्णवं गृहस्थानां न कृष्णाचि॥ नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरा-
यणैः॥ पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणं॥ सपुत्रश्च सभार्यश्च स्वजनैर्भक्ति-
संयुतः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति नारदोक्तेरित्याहुः॥ पुत्रशब्दश्चा-
पत्यमात्रवचनः॥ नारायणवृत्तौ पुमांस एव मे पुत्रा जायेरन्नित्यत्रापत्यमत्र
वाचित्वोक्तेः॥ जनयत्युत्तरं पितृन्पुत्राणीति लिंगात्॥ पौत्री मातामहस्तेनेति मनूक्तेः॥
पुत्र्या अपत्यमित्यर्थे पुत्रस्य त्वाधकिति पौत्रेय इत्यापत्तेः॥ पुमान्पुत्रो जायते शिवः
इति च॥ उपवासनिषेधो विशेषो वायवीय उक्तः॥ उपवासनिषेधे तु भक्ष्यं किं-
चित्प्रकल्पयेत्॥ न दुष्यत्युपवासेन उपवासफलं लभेत्॥ भक्ष्यं च तत्रैवोक्तं॥ न २३

क्तं हविष्यान्नमनोदनं वा फलं तिलाः॥ क्षीरमथांबु वाज्यं॥ यत्पंचगव्यं यदि वापि
वायुः प्रशस्तमत्रोत्तरमुत्तरं चेत्यन्तं॥ तत्र दशमीवेधो द्वेधा॥ अरुणोदयवेधः सू-
र्योदयवेधश्चेति॥ आद्यो गारुडे॥ दशमीविद्धसंयुक्ता यदि स्यादरुणोदये॥ नैवोपोष्यं
वैष्णवेन तद्दिने कादशीव्रतमिति॥ अरुणोदयस्वरूपं च माधवीये स्कांदे॥ उदया-
त्प्राक् चतस्रस्तु घटिका अरुणोदय इति यदपि॥ उदयात्प्राग्यदा विप्र मुहूर्त-
द्वयसंयुता॥ संपूर्णैकादशी नाम तत्रैवोपवसेद्गृहीति॥ गारुडसौरधर्मादि वच-
नं॥ यच्च स्कंदे भविष्ये॥ आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता॥ एकादशी तु सं-
पूर्णा विद्धान्या परिकीर्तितेति॥ तदप्युपसंहारन्यायेन दंडचतुष्टयपरमेव॥
व्याप्येवं॥ यत्तु अत्र वैवर्त्ते॥ चतस्रो घटिकाः प्रातररुणोदयनिश्चयः॥ चतुष्टय
विभागोत्र वेधादीनां किलोदितः॥ अरुणोदयवेधः स्यात्सार्द्धं तु घटिकात्रयं॥ अ-
तिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः॥ महावेधोपि तत्रैव दृश्यते केन दृश्यते॥
तुरीयस्तत्र विहितो योगः सूर्योदये बुधैरिति॥ तदप्यवयवद्वारारुणोदयवे-
धविशेषपरमेवेति माधवीयमदनरत्ने च॥ अंत्यः सूर्योदयवेधः॥ तथान्योपि
वेधाख्यो माध्यो माधवीये गारुडे च॥ उदयात्प्राक् त्रिघटिका व्यापिन्येकादशी य-

दा॥ संदिग्धैकादशी नाम वर्ज्यं धर्मकांक्षिभिः॥ उदयात्प्राक्मुहूर्तेन व्या
प्यैकादशी यदा॥ संयुक्तैकादशी नाम वर्ज्यं धर्मविवृद्धये॥ तथा॥ अरुणोदयो प्ये
कः श्रूयते॥ तत्र चतस्रो घटिकाः प्रातररुणोदय उच्यत इति स्कांदे॥ हेमाद्रौ रात्रे
रष्टमभागो प्युक्तः॥ निशः प्रांते तु यामार्द्धं देववादित्रवादने॥ सारस्वतानध्य
यने चारुणोदय उच्यत इति स्मृतेः॥ अत्रैके॥ एषां सर्वपक्षाणां मुहूर्तद्वयेनैको
ढीकारान्निशः प्रांते इति वचनात् रात्रिमानवशात् सार्द्धत्रिदंडादयो ऽनेके ऽरुणोद
याः॥ तदाह हेमाद्रिः॥ सार्द्धघटिकात्रयोक्तिरष्टाविंशतिघटीमानरात्रिविषया॥
महत्तरासु॥ रात्रौ स्वेस्य चतस्रो घटिका इत्येकमितीत्याहुः॥ तन्न॥ अरुणो
दयशब्दस्यानेकार्थत्वापत्तेः॥ न च मुहूर्तद्वयमर्थः॥ द्विदंडवेधे कमुहूर्तादिवेधा
नां तथात्वानुपपत्तेः॥ न हि तेषां यामार्द्धत्वमरुणोदयत्वं वास्ति॥ मुहूर्तद्वयस्य
यामार्द्धस्य च चतस्रो घटिका इत्यनेनोपसंहाराच्च न तदर्थः॥ न च सार्द्धत्रिघ
टिकात्रयमित्यनेनापि तदापत्तिः शंक्या॥ तेन चतुर्दंडवेधस्यैवोक्तेः॥ चतु
र्दंडैर्द्विघटीदशमीसत्वे हि वेधस्तदर्थः॥ द्विघटिकादौ तद्योगाच्च॥ यत्तु मतं॥ शिवः
कियतारुणोदयवेध इत्यपेक्षा सार्द्धघटिकात्रयनियमादरुणोदये द्विघटिका २४

तो न्यूनदशमीसत्वे न दोष इति॥ तन्न॥ द्विदंडादावपि तदापत्तेः॥ दशमीशे
षसंयुक्तो यदि स्यादरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिने कादशीव्रतं॥ गा
रुडे न विशेषे च योगमात्रनिषेधात्॥ नारदीयेपि॥ लववेधेपि विप्रेंद्र दशम्ये
कादशीं त्यजेत्॥ सुराया बिंदुना स्पृष्टं गंगांभ इव निर्मलं॥ स्कांदेपि॥ कलाका
ष्ठादिगत्येव दृश्यते दशमी द्विजा॥ एकादश्यां न कर्तव्यं व्रतं राजन्कदाचनेति॥
माधवोप्याह॥ सोयं कलादिवेधारुणोदयवेधे सूर्योदयवेधे च समान इति॥
निगमेपि॥ सर्वप्रकारवेधो ऽयमुपवासस्य दूषक इति॥ अत एव माधवेना
रुणोदयाद्यर्द्धदंडे स्यदशमीस्पर्शसंदिग्धा॥ तत्र घटीयोगे संदिग्धा॥ मुहूर्त
प्रलोपे व्याप्तौ संयुक्ता॥ उदये संकीर्णेत्युक्ता॥ अरुणोदयवेलायां दशमी यदि संग
ता॥ संयुक्तैकादशीं तां तु मोहिन्यै दत्तवान्प्रभुः॥ इति गोभिलोक्तेः॥ पूर्वोक्त
गारुडादेश्च सामान्यतो विशेषतश्चारुणोदयवेधो निषिद्धः॥ यत्त्वष्टमभा
गोरुणोदय इति हेमाद्रिणोक्तं॥ यच्च महत्तरा रात्रिरिति तत्परमतं स्वय
मेव दूषितं च तत्पक्षं॥ वेधतारतम्यं च दोषतारतम्यादुपपद्यत इति॥ दृ

षतारतम्यं च प्रायश्चित्ततारतम्यादवगम्यते॥ तच्चोक्तं हेमाद्रौ स्मृत्यंतरे॥
अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः॥ दशमीशेषसंयुक्तां प्रायश्चित्तमि
दं चरेत्॥ तद्रूपाद्वं नरः स्त्री वा गां च दद्यात्सवत्सिकां॥ सुवर्णस्यार्द्धकं देयं ति
लद्रोणसमन्वितं॥ विध्यानंतरं तत्रैव॥ ब्राह्मणान्भोजयेत्त्रिंशतो च दद्या
त्सवत्सिकां॥ धरणस्यार्द्धकं देयं तिलद्रोणमथापि वेति॥ अत्र वेधतारत
म्याद्व्यवस्थेति हेमाद्रिः॥ निशः प्रांते इत्यपि दोषाधिक्यार्थमेव॥ तस्मान्नवघ
टिकात्मक एवारुणोदय इति सिद्धं॥ तेन षट्पंचाशद्घटिकानंतरं दशमीप्रवेशे
ऽरुणोदयवेधः उक्तो भवति॥ अंत्योपि तत्रैव कण्वेनोक्तः॥ उदयात्परिविद्धा
तु दशम्यैकादशी यदि॥ दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासन इति॥ स्मृ
त्यंतरेपि॥ दशम्याः प्रांतमादाय यदा दृश्येत दिवाकरः॥ तेन स्पृष्टं हरिदिनं
दत्तं जंभासुराय वै इति॥ तत्रारुणोदयवेधो वैष्णवविषयः॥ तद्वाक्ये
वैष्णवग्रहणात्॥ तत्स्वरूपं च माधवीये स्कांदे॥ परमापदमापन्नो हर्षे शिवः
वा समुपस्थिते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ वित्तचर्चिता २५

खिलाचारः स हि वैष्णव उच्यते इति॥ यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्यैव वै
ष्णवत्वं न तु पुत्रादेः॥ तथापि स्वपारंपर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यंते
कुलाः॥ तत्वसागरे न विशेषः॥ यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा॥ तुल्ये ते म
न्यते यस्तु स वै वैष्णव उच्यते॥ केचित्तु दशम्यां नवमीवेधमपि त्यजंति तत्र मू
लं मृग्यं॥ उदयवेधस्तु परिशेषात्स्मार्तेणाचरः॥ तदाह माधवः॥ अरुणोदयवेधो
त्र वेधः स्यादुदये तथा॥ उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः क्रमात्॥ हेमाद्रिस्तु
केषांचिदर्द्धरात्रेपि दशमीवेधमाह॥ अर्द्धरात्रे तु केषांचिद्दशम्या वेध इष्यते॥ क
पालवेध इत्याहुराचार्या ये हरिप्रियाः॥ इति ब्रह्मवैवर्तात्॥ न तन्मम मतं य
स्मात्त्रियामा रात्रिरिष्यते॥ कैमुतिकन्यायेनारुणोदयवेधस्यैवेयं स्तुतिरि
ति तु माधवः॥ यस्तु द्विकपंचदशात्रिस्त्रयेति वेधः स उपवासातिरिक्तवि
षय इति माधवः॥ सर्वप्रकारवेधोयमुपवासस्य दूषकः॥ सार्द्धसप्तमुहूर्ते
स्तु योगोयं बाधते व्रतमिति निगमादित्यलं॥ तत्र माधवमते वैष्णवैररुणो
दयविद्धा त्याज्या॥ यदा त्वेकादश्येव स्पष्टा वर्द्धते द्वादशी वा न वा त
त्रोपोष्या॥ एकादशी द्वादशी वाधिका चेत्त्यज्यतां दिनं॥ सर्वेषामर्थं तत्तरं स्व

दितिवैष्णवनिर्णय इति माधवोक्तेः॥ स्मार्तैस्तु सूर्योदयविद्धा त्याज्या॥ य
त्वेकादशी शुद्धा सती वर्द्धते द्वादशी च न मान्यूना वा तदा गृहस्थैः पूर्वा यति
भिरुत्तरा कार्या॥ प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता॥ द्वादश्यां च तथा
तद्वस्यते पुनरेव च॥ पूर्वा गृहस्थैश्च यतिभिश्चोत्तरा विरतैरिति स्कांदे
केः॥ वर्द्धमानोप्येवमाह॥ अन्यथ वाकोनुशुद्धाधिक्ये वा सर्वेषां परैव॥ संपूर्णै
कादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति नार
दोक्तेः॥ द्वादशीमात्रवृद्धौ शुद्धायां पूर्वैव॥ न चेदेकादशी विप्लो द्वादशी परतः
स्थिता॥ उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति नारदोक्तेः॥ द्वादशीमा
त्रवृद्धौ तु शुद्धाविद्धाव्यवस्थितौ पूर्वोत्तरा विद्धास्मार्तैर्निर्णय इत्या इ
ति माधवोक्तेश्च॥ मदनरत्नेप्येवं॥ यत्तु॥ विद्धाप्यविद्धा विज्ञेया परतो द्वादशी
न चेत्॥ अविद्धापि च विद्धा स्यात्परतो द्वादशी यदीति हेमाद्रौ पाद्मवचनं॥
तदेकादश्या वृद्धौ ज्ञेयं॥ तदुक्तं माधवेन॥ एकादशी द्वादशी चेत्क्रमेण वर्द्ध
ते यदा॥ तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनमिति॥ विद्धैकादश्यां द्वाद शिव
शीमात्रवृद्धौ च सर्वेषां परैव॥ तत्रैकादशीमात्रवृद्धौ गृहिणः पूर्वा यतेरुत्त २६

रा पूर्वोक्तपाद्मोक्तेः॥ एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः॥ उत्तरां तु य
तिः कुर्यात्पूर्वामुपवसेद्गृहीति प्रचेतसोक्तेः॥ एतच्छुद्धाविद्धाविषयमिति मा
धवः॥ त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन॥ उपोष्यैकादशी तत्र दशमी
मिश्रितापि चेति स्कांदात्॥ अविद्धानि निषिद्धैश्च न लभ्यंते दिनानि तु॥ मुहू
र्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति कृष्णशृंगोक्तेश्च॥ मुहूर्तपंचकमरु
णोदयमारभ्य ज्ञेयं॥ अन्यथा त्वरेद्धि एकादश्यन्नावासंभवात्॥ यदपि हेमा
द्रिणा स्कंदवचनमात्त्यन्यूना वाधिकद्वादशीका च सर्वेषां परैवेत्युक्तं॥ तदपि
वैष्णवविषयं॥ स्मार्तानां तु पूर्वैवेत्यविरोधः॥ हेमाद्रिमते तूच्यते॥ तत्र शु
द्धाविद्धा द्वयी नंदात्रेधा न्यूनासमाधिकैः॥ षट्प्रकारा पुनस्त्रेधा द्वादश्यूनसमा
धिकैरित्यष्टादशैकादशीभेदाः॥ तत्र शुद्धाधिकन्यूनद्वादशिका शुद्धाधिकस
मद्वादशिका च सकामैः पूर्वा निष्कामैरुत्तरा कार्या॥ प्रथमेहनि संपूर्णेति स
ांके स्कांदात्॥ जनद्वादशिकायां तु विष्णुप्रीतिकामैरुपवासद्वयं कार्यं॥ सं
पूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तस्मिन्नुपवासः कथं
वेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति वृद्धवसिष्ठोक्तेः॥ शुक्ल

नाशुद्धसमा विद्धन्यूना विद्धसमाधिकद्वादशिकास्वेसर्वेषांपरैवेतिहेमाद्रिः
मदनरत्नेतुशुद्धाधिका परा॥ संपूर्णैकादशीयत्रेतिदूर्वोक्तेः॥ अन्यास्त्वा॥ ति
द्धायदासमाहीनास माहीनाधिकोत्तरा॥ एकादशीमुपवसेन्नशुद्धां वैष्णवीमा
तिस्कांदात्॥ शुद्धाएकादशी॥ उत्तराद्वादशी॥ नन्वेदकादशीविद्धेति नारदोक्तेश्च॥
यत्तु अविद्धापि च विद्धास्यादिति पाद्मं तच्छुद्धाधिकापरं॥ यत्तु संपूर्णैकादशीत्या
ज्यापरतोद्वादशीयदि॥ उपोष्या द्वादशी शुद्धा द्वादश्यामेवपारणमिति तद्वैष्ण
वविषयं॥ स्मार्त्तानांतु पूर्वैवेत्यर्थः॥ विद्धन्यूनासमद्वादशिकासु शुद्धैण
पुत्रवतांचपरा॥ अन्येषांत्वा॥ पुत्रवतापि त्वेतिमदनरत्ने॥ विद्धन्यूनद्वा
दशिकास्वसैवसर्वैःकार्येतिहेमाद्रिः॥ शुद्धैणांपरान्येषांत्वेतिमदनर
त्ने॥ विद्धसमासमद्वादशिकोनद्वादशिकासुशुद्धैःपरान्यैःपूर्वा
कार्यादशमीमिश्रितापूर्वाद्वादशीयदिलुप्यते॥ शुद्धैवद्वादशीराजन्नुपोष्या
मोक्षकांक्षिभिरिति व्यासोक्तेः॥ मोक्षकांक्षिग्रहणादन्येषां पूर्वैव॥ सर्वत्रैकाद
शीकार्याद्वादशीमिश्रितानरैः॥ प्रातर्भवतु वामावायतोनित्यमुपोषणमि
तिपाद्मोक्तेः॥ विद्धाधिकासमद्वादशिकायां सर्वेषां पूर्वैव॥ पारणाहेनजह्ने

त्रि॰ वः
२९

तद्वादशीकलयापिचेत्॥ तदानीं दशमीविद्धामुपोष्यैकादशीतिथिरितिकृष्णार्थं
णोक्तेश्च॥ माधवमतेतु अत्रग्रहिणां पूर्वायतेरुत्तरा॥ विद्धाधिकन्यूनद्वादशी
कामोक्षपापक्षयविष्णुप्रीतिकामैः पराकार्या॥ गृहस्थैनतुनक्तंकार्यं॥ एका
दशीद्वादशी च रात्रिशेषे त्रयोदशी॥ उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः इति
कामेद्दिनद्वये उपवासनिषेधात्॥ दशम्येकादशीविद्धाद्वादशीचक्षयंगता॥ त्री
ण्यासाद्वादशीश्रेयान्नक्तंतु गृहिणः स्मृतमिति वृद्धशातातपोक्तेश्च॥ गृहिणः पूर्व
त्रोपवासः॥ एकादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्याः शुद्धन्यूनसमत्वयो
रेकादश्यामुपवासः॥ यानितु॥ दशम्यनुगताहंति द्वादशीद्वादशीफलं॥ धर्मोप
त्यधनायूंषि त्रयोदश्यांतु पारणमिति कौर्मादीनि दशमीवेधत्रयोदशीपारण
योर्निषेधकानि तानिविहितनित्यपराणि॥ अत्र मूलवचनानि तदुपवस्थाकौ
स्तुभेज्ञेया॥ यत्तु कालहेमाद्रौ॥ बहुवाक्यविरोधेन संदेहो जायते यदा॥ द्वादशी च
तदा ग्राह्या त्रयोदश्यांतु पारणमिति मार्कंडेयोक्तेः॥ संदिग्धेषु चवाक्येषु द्वादशी
समुपोषयेत्॥ तथा॥ विवादेषु चसर्वेषु द्वादश्यां समुपोषणं॥ पारणं च त्रयो
दश्यां माज्ञेयं मामकी मुने इति पाद्मोक्तेश्च॥ वेधसंदेहे ज्योतिर्विदां विप्रतिप॰

तोवापराकार्यत्वकृतं दैवविषयमित्यलं बहुना॥ ॥अथयात्रोपयुक्तं कि
चिदुच्यते॥ तत्र दशम्यामेकादशीयोगे दशमीमध्य एव भोजनं कार्यं॥ एकादश्यां
न भुंजीतेति तस्या एव निमित्तत्वात्॥ निषेधस्तु निवृत्तात्माकालमात्रमपेक्ष
त इति देवलोक्तेश्च॥ केचित्तु॥ एकादशीव्रतांगत्वेन पूर्वेद्युरेकभक्तविधाना
द्विधिस्पृष्टे च निषेधानवकाशात् काम्यव्रतांगे भोजने निषेधः प्रवर्तते तेनैका
दशीमध्येपि पूर्वदिने भोजनमित्याहुः॥ अत्राधिकारी माधवीये कात्यायनेनो
क्तः॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः॥ एकादश्यामुपवसेत्पक्षयोरु
भयोरपीति॥ भविष्ये॥ ब्रह्मचारी च नारी च शुक्लामेव सदा गृहीति॥ यत्तु विष्णुः॥
पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्॥ आयुष्यं हरते भर्तुर्नरकं चैव गच्छे
तीति॥ तद्भर्त्रननुज्ञाविषयमिति प्रागुक्तं॥ उपवासासामर्थ्ये तु मार्कंडेयकौ
र्मयोः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन न निर्द्वादशि
को भवेदिति॥ अत्र एकभक्तेनेत्यादि मत्स्ये उपवासव्रतं चरेदित्येकभक्तादिषू
पवासशब्दस्तद्धर्मातिदेशार्थः॥ तेन तत्रोक्ताः सर्वे धर्माः संकल्पमंत्रे चैक शिवः
भक्तादिपदेनोहः कार्य इति मदनरत्ने॥ तथासामर्थ्ये प्रतिनिधिना कारयेदि २८

ति प्रागुक्तं॥ व्रताकरणे प्रायश्चित्तमाह माधवीये कात्यायनः॥ अर्कपर्वद्वये रात्रौ
चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति॥ ॥अथका
म्यव्रतविधिः॥ ॥लघुनारदीये॥ दशम्यादिमहीपाल त्रिदिनं परिवर्जयेत्॥
गंधतांबूलपुष्पादि स्त्रीसंभोगं महायशाः॥ तत्र दशम्यां विधिः कौर्मे॥ कांस्यं मांसं
मसूरांश्च चणकान्कोरदूषकान्॥ शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रियं॥ तथा॥
शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने॥ द्यूतमत्यंबुपानं च दशम्यां वैष्णवस्त्यजेत्॥
मदनरत्ने नारदीये॥ अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः॥ अवनीतल्पशय
नाः प्रियासंगमवर्जिताः॥ व्रतमध्ये त्वाह हेमाद्रौ देवलः॥ असकृज्जलपानाच्च स
कृत्तांबूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ अत्रैव च म
दनरत्ने देवलः॥ अत्यये चांबुपानेन नोपवासः प्रणश्यति॥ अत्यये कष्टे॥ विष्णु
रहस्ये॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं॥ व्रतस्थो वर्जयेन्नित्यं यच्चान्य
च्चानिराकृतं॥ एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे॥ स्तेनहिंसकयोः सर्वा
सत्यास्तैन्यचाहिंसनं॥ प्रायश्चित्तं व्रती कुर्याज्जपेन्नाम शतत्रयं॥ मिथ्यावादे दिवास्व
पे बहुशोंबुनिषेवणे॥ अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शतं॥ उन्मीनाच

णायेत्पश्चाद्दुरा ॥ तथैव पैठीनसिः ॥ तांबूलचर्वणं स्त्रीसंभोगमांसनिषेव-
णं ॥ व्रतलोपो नचेत्कुर्यात्तत्संख्या बंधुभिर्वर्जनमिति ॥ संभोगो ऋतुकालादन्यत्र
रेतःसेकात्मसंभोगमतेन्यत्र स्वयः स्मृत इति तन्नैव कात्यायनोक्ते ॥ हेमाद्रौ वा
सिष्ठः ॥ उपवासे तथा श्राद्धे न कुर्याद्दंतधावनं ॥ दंतानां काष्ठसंयोगो दहत्यासप्त
मं कुलं ॥ काष्ठग्रहणात्तृणपत्राद्यनिषेध इति हेमाद्रिः ॥ विष्णुरहस्ये ॥ श्राद्धोप
वासविषये खादित्वा दंतधावनं ॥ गायत्र्याशतसंपूतमंबुप्राश्य विशुध्यति ॥
निर्णयामृते व्यासः ॥ वर्जयेत्पारणे मांसं व्रताहेप्यौषधं सदेति ॥ एकादश्यां श्राद्ध
प्राप्तौ माधवीये कात्यायन आह ॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ॥
उपवासं तदा कुर्यादाघ्राय पितृसेवितं ॥ मातापित्रोः क्षयप्राप्ते भवेदेकादशी य
दि ॥ अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितमिति ॥ हेमाद्र्यादि सर्वनिबं
धेष्वप्येवं ॥ एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमिति वदंतः परास्ताः ॥
किंच ॥ महालये सपक्षः सकलः स्मृत्यः श्राद्धषोडशार्कप्रतीति ॥ अकृतं षोडशात्वं शिवः
पौषैकादश्यां च मन्वादिश्राद्धं ह्यया ह्यपरिहाने च तत्पदैकादश्यां विहितं श्रा २९
द्धं बाधितमेव स्यात् ॥ यदपि स्मृतिचंद्रिकास्कंदपर्णेति ॥ अन्नाश्रितानि पापानि

तन्नोक्तुर्दातुरेव च ॥ भुंजंति पितरस्तस्य नरके शाश्वतीः समा इति ॥ तस्यापि रा
गप्राप्तभुजिगोचरस्य वैधश्राद्धगोचरयतां महत्साहसमित्यलं ॥ योपि अन्ये
तु श्राद्धनिचयाज्ञलपिंडविनाकृता इति लघुनारदीये एकादश्यां श्राद्धादिनिषे
धः ॥ समात्तपितृमिन्नविषयः ॥ पूर्ववाक्ये तद्ग्रहणात् ॥ निर्णयः प्रतिग्रहः ॥ अ
व्रतघ्नान्याह मदनरत्ने देवलः ॥ सर्वभूतभयं व्याधिः प्रमादो गुरुशासनं ॥ अ
व्रतघ्नानि पठ्यंते सकृदेतानि शास्त्रतः ॥ स्कांदेपि ॥ अष्टौ तान्यव्रतघ्नानि आ
पो मूलं फलं पयः ॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं ॥ इदं चातिसंकष्ट
विषयं ॥ नारदीये ॥ अष्टकुल्यो नृणां प्रोक्तः क्षीणानां वरवर्णिनि ॥ मूलं फलं
पयस्तोयमुपभोग्यं भवेच्छुभे ॥ नत्वेव भोजनं केचिदेकादश्यां बुधैः स्मृतं ॥ अ
स्यापवादः ॥ शयने च मधुच्छाने मत्स्यार्थपरिवर्तने ॥ नरो मूलफलाहारी
हृदिशल्यं ममापयेत् ॥ एते चाविरोधिनो निर्णयाः सर्वव्रतेषु ज्ञेयाः ॥ तत्रैका
दश्यां संकल्पः ॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः ॥ उपवासं तु गृह्णी
याद्यद्वा वार्यं वधारयेदिति माधवीये वाराहोक्तेः ॥ मंत्रस्तु विष्णुः ॥ एकाद
श्यां निराहारः स्थित्वाहमपरेहनि ॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्यु

ति॥ शैवादीनां तु हेमाद्रौ सौरपुराणे॥ सावित्र्याप्यथ वा नाम्ना संकल्पं तु समा-
चरेत्॥ शिवाय विष्णवे यद्वा सौरे प्रोक्ता द्विजाः॥ वाराहे॥ इत्थं कार्यं ततो विद्वान्पुष्पां-
जलिमथार्पयेत्॥ ततस्तज्जलं पिबेत्॥ अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं॥
उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलमिति कात्यायनोक्तेः॥ मध्यरात्रे परदिने वा
दशमीवेधे रात्रौ संकल्प इति माधवः॥ दशम्याः संगदोषेण अर्धरात्रात्परेण वा॥ वर्ज-
येच्चतुरो यामान्संकल्पार्चनयोस्तदा॥ दिवोपवासेनमुक्तं दिनं त्यक्त्वा समाहि-
तः॥ रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेदिति नारदीयोक्तेः॥ तत्रैव ब्रह्मामनि-
धाय॥ देवस्य पुरतः कुर्याज्जागरं नियतो व्रती॥ द्वादश्यां निवेदनमंत्र उक्तः का-
त्यायनेन॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद सुमुखो नाथ ज्ञा-
नदृष्टिप्रदो भव॥ नारदीये॥ ब्राह्मणान्भोजयेद्भक्त्या दद्याद्दक्षिणां ततः॥ स्कांदे॥
भक्त्या चैवोपवासं तु योऽश्नाति द्वादशीदिने॥ नैवेद्यं तुलसीमिश्रं हत्याकोटिवि-
नाशनं॥ द्वादश्यां च वर्ज्यान्याह बृहस्पतिः॥ दिवानिद्रां परान्नं च पुनर्भोजनमैथु-
नं॥ क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्॥ हेमाद्रौ ब्रह्मांडपुराणे॥ पु- शिवः
नर्भोजनमध्वायासौ भारश्चायासमैथुनं॥ उपवासफलं हन्युर्दिवा स्वनिद्रा च ३०

२ षट्॥ नारदीये॥ रजस्वलां च चांडालं महापातकिनं तथा॥ सूतिकां पतितं चैव उच्छिष्टं रजकादिकं॥
व्रतादिमध्ये शृणुयाच्चेषां ध्वनिमुत्तमः॥ अष्टोत्तरसहस्रं तु जपेद्वेदमातरमिति॥ ए॰नि॰ २

पंचमी॥ स्कांदे॥ परान्नं कांस्यतांबूलं लोभं वितथभाषणं॥ वर्जयेद्व्रतिशेषः॥ विष्णुध-
र्मे॥ असंभाष्यान्हि संभाष्य तुलस्यतसिकादलं॥ आमलक्याः फलं वापि पारणे प्राश्य
शुध्यति॥ एतद्व्रतं सूतकेपि कार्यं॥ सूतके मृतके वापि न त्याज्यं द्वादशीव्रतमि-
ति विष्णूक्तेः॥ तत्र त्यक्तदानादि सूतकांते कार्यं॥ सूतकांते नरः स्नात्वा पूजयित्वा ज-
नार्दनं॥ दानं दत्त्वा विधानेन व्रतस्य फलमश्नुत इति मात्स्योक्तेः॥ रजोदर्शनेपि का-
र्यं॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति पुलस्त्योक्तेः॥ यदा द्वादश्यां श्रव-
णं तदा शुद्धामप्येकादशीं त्यक्त्वा तत्रोपवासः कार्यः॥ शुक्ला वा यदि वा कृष्णा द्वा-
दशी श्रवणान्विता॥ तयोरेवोपवासः स्यात्त्रयोदश्यां च पारणमिति नारदीयोक्तेः॥
एते च नियमाः काम्यव्रते नियताः॥ नित्यव्रते शक्तिसंभवे कार्याः॥ शक्तिमो भ-
क्तिपूर्वं कुर्यान्नियमं सविशेषणमिति कात्यायनोक्तेः॥ अशक्तौ तु माधवीये
अन्नं वर्जयेत्॥ इति विज्ञाय कर्तव्यं व्रतमेकादशीव्रतं॥ विशेषनियमाशक्तौ
रात्रौ तु जिव वर्जितः इति॥ ॥अथाष्टौ महाद्वादश्यः॥ ॥तत्र शुद्धाधिकैकादशी-
युता द्वादशी उन्मीलिनी॥ द्वादश्येव शुद्धाधिका चेद्वर्धते सा वंजुली॥ वासरत्र-
यस्पर्शिनी त्रिस्पृशा॥ अमे पर्वणः संपूर्णाधिकत्वे पक्षवर्धिनी॥ पुष्यर्क्षा

या॥ श्रवणायुता विजया॥ पुनर्वसुयुता जयंती॥ रोहिणीयुता पापनाशिनी॥ पु
पापक्षयमुक्तिकामउपवसेत्॥ अत्र मूलं हेमाद्रौ ज्ञेयं॥ एकादशी द्वादशी वा रा
त्रिशेषे त्रयोदशी॥ पार्श्वको तु शक्तस्योपवासद्वयं॥ एकादशीमुपोष्यैव द्वादशीं
समुपोषयेदिति विष्णुरहस्यात्॥ अशक्तो तु द्वादश्यामेव॥ एवमेकादशीं त्यक्त्वा
द्वादशीं समुपोषयेत्॥ पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति तत्रैवोक्तेः॥
यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये॥ यदा भवति अल्पापि द्वादशी पारणादिने॥ उ
षःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा॥ नारदीये॥ अल्पायामथ विप्रेन्द्र द्वाद
श्यामरुणोदये॥ स्नानार्चनक्रियाः कार्या दानहोमादिसंयुता इति॥ संकटे तु मा
धवीये देवलः॥ संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं॥ अद्भिस्तु पारणं कुर्या
त्पुनर्भुक्तं न दोषकृत्॥ संकटे त्रयोदशी श्राद्धप्रदोषव्रतादौ॥ अत्र केचिदाहुः॥ अ
पकर्षवाक्यान्यनाहिताग्निविषयाणि॥ अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादि
ति॥ द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यं॥ द्वादश्याः प्रथमः पादो हरिवा
सरसंज्ञितः॥ तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति निर्णयामृते मदनरत्ने शि॰ब॰
च विष्णुधर्मोक्तेः॥ अत्र केचित्संगिरंते॥ यदा भूयसी द्वादशी तदापि प्रातर्मुहूर्तत्र ३२

ये पारणं कार्यं॥ सर्वेषामुपवासानां प्रातरेव हि पारणेति वचनादिति॥ अस्मद्गुरव
स्तु॥ बहूनां कर्मणामानां विना कारणं बाधापत्तेः॥ प्रागुक्तवचनेनास्य द्वादश्यामे
वापकर्षविधानात् दूपराह्ण एव कार्यं॥ प्रातःशब्दस्तु सायंप्रातर्द्विजातीनामशनं श्रु
तिचोदितमिति वदन्पूर्वाह्णवाचित्वेनोपपन्नः॥ न च वाक्यवैयर्थ्यं॥ तन्नान्नेजनसायंपा
रणानिवृत्त्यर्थत्वात्तस्येत्याहुः॥ प्रमादेन एकादश्युपवासातिक्रमे पराशरो वाराह॥ ए
कादश्यां विकलतां च द्वादशीपरतः स्थिता॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति॥
केचित्तु विष्णुनाम्बेदिति पठंति॥ अत्राविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः॥ अ
यनवरात्रे वक्ष्यं तदलिखितः॥ ॥इति श्रीरामकृष्णभट्टात्मजकमलाकरभट्ट
कृते निर्णयसिंधौ एकादशीनिर्णयः॥ ॥द्वादशी तु शैवैर्युग्मवाक्यात्॥ द्वाद
शी च मकर्दद्व्यापैकादश्या युता स्मृता इति स्कांदाच्च॥ त्रयोदशी तु सर्वमते शुक्ला पू
र्वा कृष्णोत्तरा॥ त्रयोदशी तिथिः पूर्वा सिते परासितः परा इति दीपिकोक्तेः॥ शुक्लत्र
योदशी पूर्वविद्धा त्रयोदशीति माधवादि॥ चतुर्दशी तु सर्वमते शुक्ला पूर्वा कृष्णो
कोत्तरा॥ उपवासे तु द्वयमपि परेति मदनरत्ने॥ पौर्णमास्यमावास्ये तु सावित्री
व्रतं विना परे ग्राह्ये॥ एतद्विधानकर्तव्ये दर्शस्तेषां करावना॥ वर्जयित्वा मुनि

छ सावित्री व्रतमुत्तममिति ब्रह्मवैवर्त्तात्॥ अमायां योगविशेषो पराशरे शातातपः॥ अ
मावास्यां न वेद्वारो यदा दृष्टिसुतस्य॥ गोकवी स्नानमात्रेण गोसहस्रफलं लभे
त्॥ अमावासोमवारेण रविवारेण सप्तमी॥ चतुर्थी भौमवारेण विषुवसदृशं फलं॥
तत्रैव व्यासः॥ सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्॥ गोसहस्रफलं दद्यात्स्ना
नं वै मौनिना कृतं॥ हेमाद्रौ बृहन्मनुः॥ श्रवणाश्विधनिष्ठाद्रानागदैवतमस्तके॥ य
द्यमा रविवारेण व्यतीपातः स उच्यते॥ नागदैवतमश्लेषा॥ मस्तको मृगशिरः॥ अथ म
पार इत्यन्ये सच सर्वेषां॥ ॥अथेष्टिकालः॥ ॥गोभिलः॥ पक्षान्ता उपवस्तव्या
पक्षादयोभियष्टव्या इति॥ उपवासो न्वाधानं॥ तत्र मध्याह्नेतस्सर्वे वा पर्वप्रतिपत्संधौ
तद्दिने यागः॥ पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते॥ उपोष्य तत्र पूर्वेद्युस्तद्दहर्याग
इष्यत इति लौगाक्षिवचनात्॥ अन्वाधानविभागः॥ आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्त
तः परः॥ मध्याह्नस्तु तयोः संधिर्यदावर्त्तनमुच्यत इति मदनरत्ने वचनात्॥ मध्या
ह्नोर्द्ध्वं संधौ माधवमते परेद्युर्यागः॥ अपराह्णेथवा रात्रौ यदि पर्व समाप्यते॥
उपोष्यते स्मिन्नहनि श्वोभूते याग इष्यत इति लौगाक्षिणोक्तेः॥ हेमाद्रिस्त्वपराह्ण शिवः
संधावपि परदिने प्रतिपद्वृद्धौ यागो चंद्रोदये च सति द्वितीयादिघटिकं तद्दृश्य सति ३२

पूर्वेद्युर्यागः॥ पर्वणो यो द्वितीयेंशस्तु यष्टव्यं तु द्विजातिभिः॥ द्वितीयासहितं यस्मा
त्तद्रूपं स्यादाश्वलायना इति॥ द्वितीये त्रितिकेंशे तिन्याये न चतुर्थांशपरं॥ तुरी
ये त्रिति शूलपाणौ पाठः स्पष्टार्थ एव॥ तथा॥ भूता पंचदशीहीना द्वितीया च
युगामिनी॥ चरुरिष्टिरमावास्या भूते कव्यादिकी क्रियाइति बोधायनवच
नाच्चेत्यपि विद्वांस॥ मदनरत्नेपि॥ चतुर्दशी चतुर्थांमा अमावास्या न दृश्यते॥ श्वो
भूते प्रतिपद्वृद्ध्या स्यात्सर्वं तत्रैव कारयेदिति॥ यत्तु माधवः॥ यस्तु वाजसनेयी
स्यात्तस्य संधिदिनात्पुरा॥ न कार्यन्वाहितिः किंतु सदा संधिदिने हि सेत्याह॥
यच्च कालादर्शे पक्षं॥ आवर्त्तनादूर्ध्वं संधिर्यदान्वाधायतद्दिने॥ परेद्युरि
ष्टिरित्याद्यु विप्रा वाजसनेयिन इति॥ यच्च मदनरत्ने॥ मध्यंदिनास्यादहनीह
यस्मिन्दर्शकपर्वणः संधिरियं तृतीया॥ सार्ववर्णिकावाजसनेयिमत्यातस्या
मुपोष्याथ परेद्युरिष्टिरिति॥ एतन्मौग्मासीपरामिति तत्रैव॥ आवर्त्तनो
र्द्ध्वं निर्वाणमस्तु ध्वान्तो वा समाहृते॥ मध्याह्नादर्वाक्समाप्तात्तृतीये त्वर्द्ध्वं॥ स
क्के कैनाथ्य देवजानिश्रीमन्नंतनाथ्यादिसकलतच्छारवीयग्रंथविरोधा

कृष्णानादराच्चोपेक्ष्यं॥ पौर्णमास्यां विशेषमाह कात्यायनः॥ संधिश्चेत्संगवादू
र्ध्वं प्राक्पर्यावर्त्तनाद्रवेः॥ सा पौर्णमासी विज्ञेया सद्यस्कालविधौ नरैः॥ अन्
यां विशेषमाह बौधायनः॥ द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपद्यापराह्णिकी॥ अन्वा
धानं चतुर्दश्यां परतः सोमदर्शनात्॥ कात्यायनश्च॥ यजनीयेह्नि सोमश्चेद्वा
रुण्यां दिशि दृश्यते॥ तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातये इति॥ एतच्च बौ
धायनवाजसनेयिविषयं॥ तैत्तिरीयस्य तु दर्शनेपि यागायुक्तः॥ ए
षा वै सुमनानामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै
लोकेर्धुकं भवतीति॥ श्रुत्यंतरेपि॥ यदहः पश्चाच्चंद्रमा अभ्युदेति तदह
र्यजन्निमाल्लोकाननुदेतीति॥ मदनरत्नेप्येवं॥ आपस्तंबनाप्यार्थसं
ग्रहेप्येवं॥ अतः परे द्वयस्य स्वस्वसूत्राद्यवस्थेति तत्त्वं॥ द्वैधं त्याज्यबलाद्य
नादरति तु द्वयोर्वा स्वसंधिविषयमिति माधवः॥ शेषपर्वण्येष्टौ विशेषमाह
माधवीये गार्ग्यः॥ प्रतिपद्यप्रविष्टायां यदि वेष्टिः समाप्यते॥ पुनः प्रणीय 33
तत्रेष्टिः कर्तव्या यागवित्तमैः॥ इत्यग्नेनर्यं नियमं रतिमदनपारिजा

संधि

त॥ एवं पर्वण्यंशः प्रतिपदश्च त्रयोंशा यागकालः॥ उक्तः॥ क्वचित्प्रतिपद्
द्वोशेपि यागः॥ यद्यपराह्णे स्याद्यागं प्रातः परेहनि॥ कुर्वीत प्रतिपद्भागे चतुर्थेपि
न दुष्यतीति वृद्धशातातपोक्तेः॥ एतत्पूर्णिमापरमिति मदनरत्ने॥ पर्व
णि प्रतिपदः क्षयस्य वृद्धेश्चार्द्धं प्राह्य संधिर्ज्ञेयः॥ तदाह माधवः॥ वृद्धिः प्र
तिपदो यास्ति तदर्द्धं पर्वणि क्षिपेत्॥ क्षयस्यार्द्धं तथा क्षिप्त्वा संधिर्निर्णीयतां
सदेति॥ कात्यायनोपि॥ परेह्नि घटिकान्यूनास्तथैवाभ्यधिकाश्च याः॥ त
दर्द्धं स्यात्पूर्वस्मिन्का सवृद्धी प्रकल्पयेदिति॥ एवं स्मार्तस्थालीपाकेपि
ज्ञेयं॥ तत्रेष्टिस्थालीपाकावाधानोत्तरं प्रवेशनीयहोमानंतरं चान्वां पौ
र्णमास्यां प्रारंभणीयौ॥ नतु दर्शे॥ यद्यारंभे मलमास पौषमासशुक्रास्ता
दिर्भवति तदाप्यारंभः कार्यः॥ याज्ञिकास्तु पराशरोधिमासश्चयादि प्रथमप
र्वणि॥ तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्ये न
क्षसूर्ये ग्रहे तथेति संग्रहवचनानि तानि आलस्यादिनातिक्रांततत्तत्का
लप्रारंभविषयाणि॥ नामकर्म च दर्शेष्टिं यथाकामं समाचरेत्॥ प्रतिप

तिसृति तयोः प्रशस्तेमासि भ्रुलये तेत्य परार्कवचनादिति प्रयोगपारिजाते॥ मू
र्कंचैतत्प्रयोगरत्नेप्युक्तं॥ कालादर्शेपि नामकर्मचजातेष्टिमिति पाठः॥ याज्ञि
कास्तु॥ आधानानंतरा पौर्णमासीचेन्मलमासगा॥ तस्यामारंभणीयादीन्
ऊ वीतकदाचनेति त्रिकांडवचनमुक्तकालएव विप्रवेष्टिं लत्वोपारंभं कुर्या
दित्याहुः॥ कालादर्शस्मृतिसंग्रहे॥ आरंभंदर्शपूर्णेष्ट्यो रग्निहोत्रस्य चादिमं॥
प्रतिष्ठाः पंचकर्माद्याः मलमासे विवर्जयेदिति॥ अथ विकृतिः॥ तत्रापस्तंबः॥
यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोमावास्यायां पौर्णमास्यां वेति
प्रकृतितः कालेसिद्धेपि सद्यस्कालता विधेया॥ कृती यासांगतोक्तेः॥ अत्र पौ
र्णमास्यमावास्याशब्दाभ्यां तदंत्य लक्षणेष्यते॥ तेन तदंत्यहोरात्रेस्त्यर्थः मा
हृरामांडारः॥ माधवोपि॥ इष्ट्यादिविकृतिः सर्वापर्वण्येवेति निर्णयदीति॥
अत्र विशेषमाह त्रिकांडमंडनः॥ कात्यायनश्च॥ आवर्तनात्प्राग्यदिपर्व
संधिः स्यात्तुतस्मिन्प्रकृतिंविदध्यात्॥ तदेवयागः परतोयदिस्यात्तस्मि शिवः
न्विकृत्याः प्रकृते परेद्युरिति॥ धूर्तस्वाम्यादयोप्येवमाहुः॥ यद्वेष्टि ३४

सांगायाविकृतेः पर्वकालत्वादावर्तनात्प्राक् संधौ संधिमनितोयजेते ति
प्रकृतेः प्रतिपदि समाप्तिनियमात्स्वकालत्यनंतरं प्रतिपदि विकृत्यप्रयोग
स्तु बाधक विकृतिरित्युक्तं तंत्ररत्ने पार्थसारथिना॥ यद्यपि प्रकृतेः पूर्व
त्वादपूर्वमंतेस्यादिति आपस्तंबेनोक्तं॥ तथापि हेतुवादेनश्रुतिमूलत्वा
तावादृशं वासमन्निव्याहारादितिवद्प्रामाण्यमिति तद्धाराय॥ आग्र
यणेतु विशेषं वक्ष्यामः॥ अन्वारंभणीयातु चतुर्दश्यां कार्येति॥ हिरण्य
केशिवत्रौमात्स्यदत्तीय॥ अन्येषां पर्वण्येव पशौ कालांतरमप्याह बौधा
यनः॥ आमावास्येन वाहविषेष्ट्वा नक्षत्रे चेति॥ शुक्लपक्षे ह्यन्निकादिवि
शाखांतेषु दशनक्षत्रेष्विति केशवस्वामी व्याचख्यौ॥ चातुर्मास्येष्वपि द्वा
दशाहं यथा प्रयोगपक्षयोर्नक्षत्रेष्वप्यारंभः॥ याज्ञिकीवसांवत्सरप्रयो
गयोगयोस्तु फाल्गुन्यां चैत्र्यां वारंभः॥ पशौतु विशेषमाह कात्यायनः॥
अर्वाग्दिक्षोन्नवतिनियतं पर्वसंधिः परस्तात्कृत्वा तस्मिन्नहनितु पशुं
सद्य एव व्यहरवा॥ आरम्भाय प्रकृतिरयचेत्पर्वसंधिस्तु परस्तात्कृत्वा तं

क्षिप्र इति मिथ उस्यात्स्मृत्यर्थ एव॥ अधिकारस्त्वग्निहोमीयेणास्तवनीये न
समानतंत्रो वा कार्य इति त्रिकांडमंडनः॥ सोमेत्वापस्तंबः॥ अमावास्यायां
दीक्षायजनीये वा पौर्णमास्यां यजनीये वा सुत्यमथ्यां हरिति॥ आश्वला
यनसूत्रेपि॥ दर्शपूर्णमास्यत्रयमेहनि दीक्षेत न नक्षत्रयोगे चेति॥ दर्शपक्षः
शुक्लपक्षः॥ नक्षत्रयोगे वैत्ययमर्थः॥ पौर्णमास्यां दीक्षां यजनीये वा सुत्यय
मर्थः॥ चैत्रादि पौर्णमाया चित्रा नक्षत्रयोगे चेति॥ आधानं तु पर्वणि नक्ष दीक्षेत
त्रेषु चोक्तं॥ तत्र पर्वणे नक्षत्रगार्हपत्यमादधीतीत्यादि वाक्यं कर्मकालव्याप्ति
माहं॥ दिनद्वये तत्वे परं ग्राह्यं॥ संकल्पस्य पर्वणि आत्राह॥ पूर्वत्र नक्षत्र
योगे तदेव ग्राह्यं॥ पूर्वत्रीणि सन्निपतितान्युक्तं नक्षत्रं च पर्व तत्समक्ष
विप्रतिषेधे ऋतुर्नक्षत्रं च बलीय इति हिरण्यकेशिसूत्रात्॥ ऋतुर्वसं
ते आग्नेणो त्रिमादधीतेत्यादि॥ हेतुकारिकायां तु॥ माघादिपंचमासे शिवः
श्रुष्यावणो चाश्विने तथा॥ मार्गशीर्षेषु कपक्षे आधानमथ कार्यमित्युक ३५
क्तं॥ अत्र मलं मृग्यं॥ आधाननक्षत्राणित्यापस्तंबसूत्रे॥ कृत्तिकारो

हिणीमृगशीर्षपुनर्वसुपुष्यपूर्वोत्तराफल्गुन्याषाढोत्तराषाढाहस्तचित्राविशाखानु
राधाश्रवणोत्तराभाद्रपदा इति॥ सोमपूर्वाधाने विशेषमाहापस्तंबः॥ सोमेन
यक्ष्यमाणो आदधानो न र्तुन् पृच्छेन्न नक्षत्रमिति॥ अत्र प्रकरणादाधानकाल
बाधः॥ तेन सोमस्य वसंतकालता न बाध्यत इति॥ कल्पतरुस्तु नारायणवृ
त्तौ चोक्तं॥ तत्र स्त्रे वाह्निके च ते वा एते उनयेऽपहतपाप्मानो ऋतवः एष वा
ऋतुः मन्त्रादित्यपाप्मनोपहतायदैवैनं कदाचन यज्ञ उपनमेदथादधीतेत्य
स्यां ग्रेनारायणरूपं दैव्ये दाक्षिणायनं रूपं च पित्र्यमत उत्तरायणमित्यभिप्रायमन्य
स्यत्रय सोमाधाने शांतपर्वो विहितं॥ तदेकवाक्यतया शाखांतरेपि न ऋतु नक्ष
त्रेदित्यत्र सोमकाल काल बाध एव॥ आधानकालबाधस्य यदैवैनं श्रद्धो
पनमेत तदादधीतेत्यस्यां शाखायां वाक्यांतरेण सिद्धत्वात् सोमकालबाधा
र्थमेव युक्तं॥ धूर्तस्वामी तु सोमस्यापि ऋतुः स्तस्यापि न ऋतु नक्षत्रेदिति लिखना
दुभययकालबाधं मन्यते॥ श्रीरामांडारस्तु कालांतरविधानं वा सर्वकाला
नादरो वेति पक्षद्वयमुक्तवान्॥ तत्राद्ये कृत्तिकादिकालांतरस्य यथाधाने
वसंतादिबाधनविधानं॥ तथा सोमेष्वदगयन पूर्वपक्षाद्युक्तमाह संनिपा॥

तेयुक्तकालोनादेश इतिहेमाद्रिः सूत्रोक्तोदगयनाद्यबाधेनमाप्तिसंधिरूप
कालांतरविधानादुदगयनंव्यपेक्ष्यतइत्युक्तं॥ द्वितीयपक्षेतुयद्देवेनंयु
क्तउपनमेदितिसर्वकालानादरइत्युक्तइतिनरहरिसूत्रेसर्वमावस्यच
विच्छि सर्वदृष्टइति वृद्धयोरत्रयोगास्सर्वकालबाधः॥ तेनेदक्षिणायने
पिनवतीत्युक्तं षष्ठ्युक्तावेदेवत्रातत्राप्येतंत्ररत्नेचषड्स्यापिकृत्येश्रुतव
तीत्युक्तमितिदिक्॥ श्राद्धेत्वमावास्यात्रेधाविभक्तदिनतृतीयांशोयोपराह्ण
भागस्तद्व्यापिनी साग्निकैःकार्या॥ पिंडान्वाहार्यकंश्राद्धंक्षीणेराजनिशस्य
ते॥ वासरस्यतृतीयेंशेनातिसंध्यासमीपतइतिकात्यायनोक्तेः॥ दर्शश्राद्धंतु
यत्प्रोक्तंपार्वणंतत्प्रकीर्तितं॥ अपराह्णेपितॄणांचतत्रदानंप्रशस्यतइतिशाता
तपोक्तेश्च॥ दिनद्वयेतत्रसत्वेसर्वापराह्णव्यापीदर्शोग्राह्यः॥ यत्तुनयत्कारे
षविहितःसर्वापराह्णस्थितइतिदीपिकोक्तेः॥ यच्चकाष्णाजिनिः॥ नूतनविद्याम
मावास्यांमोहादज्ञानतोपिवा॥ श्राद्धकर्माणियेकुर्युस्तेषामायुःप्रहीयतइ
ति॥ तदपराह्णेचतुर्दशीवेधपरमितिश्राद्धहेमाद्रिः॥ अपराह्णव्याप्तिपरमि शिवः
तिमाधवः॥ दिनद्वयेपराह्णव्याप्त्यभावेसाम्येवांशतोव्याप्तौचतिथिक्षयेपूर्वेति २६

हेमाद्रिः॥ यदाचतुर्दशीयामंतुरीयमनुपूरयेत्॥ अमावास्याक्षीयमाणातदै
वश्राद्धमिष्यतइतिकात्यायनोक्तेः॥ चतुर्दश्याश्चतुर्थंयामंदर्शःपूरयेत्॥ च
तुर्दशीयामत्रयंस्यादित्यर्थः॥ क्षीयमाणापरदिनेपराह्णव्यापिनी नेत्यर्थः॥
व्यतिरेकमाह॥ वर्द्धमानाममावास्यांलक्षयेदपरेहनि॥ यामांस्त्रीनधिका
न्वापिपितृयज्ञस्ततोभवेत्॥ ततःश्राद्धंच॥ दिनद्वयेपराह्णव्याप्त्यादौति
थिवृद्धौचहारीतः॥ त्रिमुहूर्तापिकर्तव्यापूर्वाखर्वाचैवबह्वृचैः॥ कुहूरध्वर्यु
भिःकार्यायथेष्टंसामगैरिति॥ त्रिमुहूर्तान्यूनावेतुपूर्वानित्यर्थः॥ पिंडपितृ
यज्ञस्तुकात्यायनैर्यागदिनात्पूर्वेद्युःकार्यः॥ पूर्वांगत्वात्पिंडपितृयज्ञ
इतितत्सूत्रात्॥ व्याख्यातंचैतत्कर्काचार्यैः॥ पूर्वएवदर्शात्पिंडपितृय
ज्ञोनपश्चात्॥ कुतःअंगत्वात्॥ तथाचश्रुतिः॥ तस्मात्पूर्वेद्युःपितृभ्यः
क्रियतेउत्तरमहर्देवान्यजंतीति॥ पूर्वेद्युःपितृभ्योयज्ञंनिरुप्योत्तरमा
तर्देवेभ्यःप्रतनुतइतिच॥ तेनतन्मतेगमेवासो॥ तदुक्तं॥ अंगंवासम
न्निव्याहारादिति॥ तेनकर्कमतेचतुर्दशीयुक्तदर्शेपिंडपितृयज्ञइति॥

श्रीअनंतभाष्ये तु परेद्युरित्युक्तं॥ अत्र द्वेधा प्रकारो दृश्यते॥ आपस्तंबानां तु
परदिने कृत्स्नमपि दर्शसत्वे तत्रैव पिंडपितृयज्ञः॥ तदाहापस्तंबः॥ अमा
वास्यायां यदहश्चंद्रमसं न पश्यंति तदहः पिंडपितृयज्ञं कुरुत इति॥ अस्य
रुद्रदत्तीव्याख्यापि दर्शे श्रुतः पितृयज्ञः पिंडपितृयज्ञः॥ स च कर्मांतरं न तु दर्श
शेषः॥ यथा वक्ष्यति॥ पितृयज्ञः स्वकालविधानादनंगं स्यादिति॥ तेन यदह
श्चंद्रमसं न पश्यंति पंचदश्यां प्रतिपदि वा तदहः कुर्वीत॥ यदहस्तयोः संधिस्त
दहरित्यर्थ इति॥ श्रीरामांडारोप्याह॥ पिंडपितृयज्ञस्तु पर्वसंधिमदहोरात्रा
पराह्ण इति॥ अतः पर्वसंधे पितृयज्ञः॥ शतपथश्रुतिरपि॥ यदैवैष न पु
रस्तान्न पश्चाद्ददृशे यपितृभ्यो ददातीति॥ एवं पर्वसंधिदिने दृष्टे पूर्वतः
पश्चाद्वा चंद्रो न दृश्यत एवेत्यर्थः॥ सत्याषाढोपि पितृयज्ञं प्रक्रम्य दृश्य
माने त्वपोथ्यस्नोन्हुते ईयजते इत्याह॥ हेमाद्रिस्तु अमावास्याशब्दस्तिथि शिवः
वचन एव हरदत्तापस्तंबसूत्रे यदुक्तं न पश्यंतीति तत्र द्वयोरपि प्रेतैः॥ अ
तश्चतुर्दश्यां चंद्रस्य क्षीणत्वान्नष्टचंद्रदर्शे पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रके ३१

यस्मिन्मानिति मन्वुक्तेः॥ यदुक्तं यदहस्त्वेव दर्शनं नैति चंद्रमाः॥ तच्छ्यापि ह्या
क्षेयं क्षीणः पाउनिवेत्यपीति॥ यदुक्तं दृश्यमानेपि तत्रैव दर्शपेऽन्हृयति कात्या
यनोक्तेः॥ दृश्यमाने प्येकरतिगास्तिलोकेः॥ यस्यां संध्यागतः सोमो मण्यत
मिव दृश्यते॥ अपराह्ने द्वयस्तस्यां पिंडानां करणं ध्रुवमिति हारीतोक्तेश्च॥
चंद्रक्षयकालस्योक्तः कात्यायनेन॥ अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्र
माः॥ अमावास्याष्टमेंशे च पुनः किल भवेदिति॥ तन्न सर्वेषां रेव पितृयज्ञ
स्यकृत्यत्वान्॥ कर्काचार्यैरपि॥ अपराह्ने पिंडपितृयज्ञः चंद्रादर्शनेमावास्या
यामिति कात्यायनसूत्रे अदर्शने न क्षय एवोक्तः॥ तस्मिन् क्षीणे ददातीति श्रु
तेः॥ अतस्तन्मते चतुर्दशीयुक्तदर्शे पितृयज्ञे सति परदिने यागो यो सिद्धः॥
तदयं सर्वोपदिष्टमपि हेमाद्रिकर्कादिव्याख्यानमापस्तंबेतरन्कपरमाका
तीयबोधायनादिविषयं॥ आश्वलायनानामपि शेषपर्वणि पितृपितृय
ज्ञः॥ तथा च सूत्रं॥ अमावास्यायामपराह्णे पिंडपितृयज्ञ इति॥ अत्र ना
रायणवृत्तिः॥ अमावास्याशब्दः प्रतिपत्पंचदश्योः संधिवचनोप्यत्रापरा

कृतावृत्तमन्वयासदृत्यहोरात्रे वर्तते॥ तस्यापराह्णे कृष्णचतुर्थेनाग्नौ पिंडपि
यज्ञः कार्यः॥ औपवसथ्यं यजनीयं वाहनि। यदा त्वहोरात्रसंधौ तिथिसंधिः स्या
त्तदौपवसथ्य एवाहनि क्रियत इति॥ अत एवामुहूर्तममावास्याप्रतिपद्यपि चे
त्रवेत्॥ तदन्नमहर्यज्ञेयं पर्वशेषं तु पर्वविदिति हेमाद्रौ वचनं पिंडपितृय
ज्ञपरस्त्विके प्रयोगपारिजाते॥ अयं च साग्निमतासंदर्शश्राद्धव्यतिषंगे
णाकार्यः॥ व्यतिषंगो नामानयोः सहानुष्ठानं॥ एतच्च स्थालीपाकेन सह पिंडपितृय
ज्ञं कृत्वेति सूत्रे वृत्तिकृतोक्तं॥ खंडपर्वणि त्वेके केचिदाहुः॥ पूर्वाह्णे पिंडपितृय
ज्ञव्यतिषंगेण श्राद्धं कृत्वा परेह्नि केवलः पिंडपितृयज्ञः कार्यः॥ अन्ये तु तान्व
ष्टकां च पूर्वेद्युः सोमार्धमास्य च पार्वणं॥ काम्यमाभ्युदयेऽष्टम्यामेकोद्दिष्टमथा
ष्टमं नित्यकृत्यं सर्वेषु चतुर्षु स्थालीपाकाद्युत्तराभ्योकरणं नित्यं केचिद्दर्शश्रा
द्धे स्थालीपाको नियत इति गम्यते॥ स्थालीपाकश्च पितृयज्ञ एवेति पूर्वदिने शिवः
व्यतिषंगः सिद्धः॥ प्रयोगपारिजाते तु वार्षिकश्राद्धादेरपि व्यतिषंग उक्तः॥ कि
न्तु तदर्शश्राद्धस्यान्यायविदस्त्वाहुः॥ सूत्रस्य तत्रैव संदर्शदर्शविषयत्वात् २८

खंडपर्वणि पूर्वदिने केवलं श्राद्धं परदिने च केवलः पितृयज्ञः कार्यः॥ अत एवो
क्तं वृत्तिकृता॥ नाचार्याः पूर्वः स्थालीपाकमाधत्ते सर्वश्राद्धेषु प्रसंगादिति॥ प्रयोग
पारिजातोक्तिरप्येतद्विषयैव॥ पूर्वदिने च श्राद्धेऽग्नौकरणमेव न पाणिहोमः॥ च
तुर्थ्यां च साग्नीनां वह्नौ होमो विधीयते॥ पित्र्ये ब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्व
पीति परिशिष्टनियमात्॥ पूर्वदिने च श्राद्धेऽग्नौपचारस्य कर्तव्यत्वादग्नौ होमः॥ नान्या
ग्नौपचारमन्याग्नौ कुर्यादिति निषेधात्॥ मैवं॥ श्राद्धस्य गृह्यत्वेन स्मार्ताग्नौ पच
नाग्नौ वा कर्तव्यत्वात् तस्मात्पूर्वेद्युः केवलं श्राद्धं न व्यतिषंगः॥ इदमेव वृत्तावुक्तं॥
आहिताग्नीनां तु सर्वाधानिनामर्धाधानिनां च संदर्शे खंडे वा दर्श औपासनाग्नौ
पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धव्यतिषंगेणेति विस्तरश्रौतविरमामः॥
संदर्शे दर्शे च विशेषमाह लौगाक्षिः॥ पक्षांतकर्म निर्वर्त्य वैश्वदेवं च साग्नि
कः॥ पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति॥ पक्षांतकर्मेन्वाधानं॥
अन्वाहार्यकं दर्शश्राद्धं॥ अयमेव साग्नेर्जीवत्पितृकस्य पिंडपितृयज्ञका
लो ज्ञेयः॥ तस्यापि कात्यायनेन होमांतमनारंभो वेत्याम्नानात्॥ पिंड चि

प्रयोगकरणे प्रायश्चित्तमाह पराशरमाधवीये कात्यायनः ॥ पितृयज्ञं त्व
वै वैश्वदेवात्ययेपि च ॥ भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदित्युक्तं ॥ अत ए
व तु स्मरामः ॥ निरग्निकादिभिस्त्वमावास्या पराह्णव्यापिन्यपराह्णकालव्यापि
नी ग्राह्या ॥ स्थूलविचारे त्वमावास्या प्रतिपन्मिश्रितापि वा ॥ पितृकर्मणि विद्धा हि
ग्राह्याऽकुतपकालिकी तिथिरिति हारीतोक्तेः ॥ इदं च निरग्न्यादिविषयं ॥ सिनीवाली द्विजैः
कार्या साग्निकैः पितृकर्मणि ॥ स्त्रीभिः शूद्रैश्च कुहूः कार्या तथा चानग्निकैर्द्विजैरि
ति लौगाक्षिवचनात् ॥ अत्र साग्नित्वोपासनाग्निरपीति मदनपारिजाते उक्तं ॥ कु
तपव्याप्तं पराह्णव्याप्त्यभावेन तु कथ्यम् ॥ अपराह्णद्वया व्यापी यदि दर्शतिथिः स्या
त् ॥ आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मतेति जाबालिनाम्नो विधानात् ॥
तेन साग्नीनां निरग्नीनां वा पराह्णव्यापिन्येव मुख्या तिथिः ॥ साम्ये वा दिनद्वये स
मव्याप्तौ पूर्वदिना निर्णयः ॥ वैषम्ये अधिकादिनद्वये पराह्णस्पर्शेऽकुतपव्यापि
नीति माधवः ॥ इदमेव युक्तं ॥ हेमाद्र्यादिमते कुतपव्यापिन्येव निरग्न्यादेर्मु शिवः
ख्या ॥ सिनीवाली दृष्टचंद्रा ॥ तथा च व्यासः ॥ दृष्टचंद्रा सिनीवाली नष्टचंद्रा कु ३९

हूः स्मृतेति ॥ पूर्वदिने परदिने एव वा तद्व्याप्तिवैसेव ग्राह्या ॥ अमाव्याप्तित्वे
वैषम्ये अधिककालव्यापिनी ग्राह्या ॥ दिनद्वये शतः समव्याप्तौ तिथिपूर्वार्धेऽमा
स्य च परा ॥ तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ॥ साम्ये पि च कुहूर्
या वेदवेदांगवेदिभिरिति त्रच्चेतो वचनात् ॥ दिनद्वये संपूर्णकुतपव्याप्तिस्थ
तिथिवृद्धौ वेवन्नवतीत्यनंतरवचनात्परैवेति ॥ कुतपस्तु ॥ अत्रोक्तं स्मृतौ विशे
याद्दशपं चश्च सर्वदा ॥ तत्राष्टमो मुहूर्तो यः सकालः कुतपः स्मृत इति मात्स्योक्तेः ॥
चदर्शादानपितृदेवश्री त्ययोपवासादौ तु पराग्राह्येत्यन्यत्र विस्तरः ॥ दर्शे च
मासिकवार्षिकादिश्राद्धप्रसंगाद्दर्शे विशेष उक्तः ॥ दर्शस्य चोदकं भस्य
दर्शमासिकयोरपि ॥ नित्यस्य वार्षिकस्यापि द्वादशाब्दिकयोरपीत्यस्य ॥
संपाते दैवतात्पद्रा श्राद्धयुग्मं सहाफलं ॥ माचरेत् ॥ निमित्तानियतिश्चात्र प्र
वर्तुभानकारणमिति ॥ अत्र क्रमो निर्णयप्रदीपे उक्तः ॥ नष्टचंद्रे यदा का
ले संपाते दिवसो भवेत् ॥ वैश्वदेवं स यत्श्राद्धं कुर्यात्तत्रादर्शकर्मणः ॥ अ
मावश्राद्धं चानुपनीतोपि कुर्यात् ॥ श्राद्धस्यल पाणौ ॥ अमावास्याष्टकान्दा सा

हपंचदश्यां तु चेत्पक्रम्य॥ एतच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वसु॥ श्राद्धं
धारणं नाम सर्वकामफलं॥ नार्या विरहितोप्येतत्प्रवासस्थोपि नित्यशः॥ स्थ
यमं त्रवत्कुर्यद्दिनेन विधिनाबुध इति मात्स्योक्तेः॥ अमावास्यातिक्रमे प्राय
श्चित्तमुक्तं मन्विधाने॥ न्यूषवा चं जपेन्मंत्रं शतवारं दिने दिने॥ अमावास्यां य
दानास्ति तदा संपूर्णमिति तत्॥ अत्र दर्शोक्त साग्निकपदेनाहिताग्निः स्मार्ताग्नि
मांश्च गृह्यते॥ विच्छिन्नाग्निकादिश्च निरग्निकः॥ तथा च हेमाद्रिः अग्नौ करणं त्वक
रणे॥ साग्निरप्यनग्निः स्यात् द्विजपाणौ यथा स्तु वा॥ कुर्याद्दर्शे क्रियां नित्यं लौकि
केनेति निश्चितमिति स्मृतिवाक्यमुदाहृत्य यस्त्वस्वीकृतौपासनयासमुच्छि
न्नाग्निर्यश्च भार्याविधुरतयाग्निरहितस्तस्य द्विजपाणौ जलादौ वा होम इति
व्याचष्टे॥ मदनपारिजातेप्येवं॥ इदमेव साग्निकानग्निकस्वरूपं सर्वत्र ज्ञे
यं॥ ॥इति अमावास्यानिर्णयः॥ ॥अथ ग्रहणं निर्णीयते॥ ॥तत्र शिवः
चंद्रग्रहणे यस्मिन्यामे ग्रहणं तस्मात्पूर्वं प्रहरत्रयं न भुंजीत॥ सूर्यग्र ४०
हे तु प्रहरचतुष्टये न भुंजीत॥ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं॥ चं

द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विनेति माधवीये वृद्धगौतमोक्तेः॥ ग्रह
णं चेन्नव दिशेः प्रथमादधियामतः॥ भुंजीतावर्तनात्पूर्वं प्रथमे प्रथमादधः
इति मार्कंडेयोक्तेश्च॥ अधिकं ई॥ ननु चंद्रग्रहे यामचतुष्टयनिषेध उचितो न
तु सूर्यग्रहे॥ सूर्योदयात्प्राक् भोजनाप्राप्तेः॥ मैवं॥ वचनस्य प्रथमयामे सूर्य
ग्रहे सति रवेरुदः पूर्वरात्रेर्भोजननिषेधपरत्वात्॥ चंद्रग्रहे विशेषमाह माध
वीये वृद्धवसिष्ठः॥ ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति द्वयोर्ग्रस्ता
स्ते तु माधवीये व्यासः॥ अमुक्तयोरस्तगयोरद्याद्दृष्ट्वा परेहनीति॥ विष्णुध
र्मेपि॥ अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा॥ मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं
कृत्वा ततः परं॥ अहोरात्रनिषेधः॥ सूर्यग्रस्तास्ते मदनरत्ने गार्ग्यः॥ संध्या
काले यदा राहुर्ग्रसते शशिभास्करौ॥ तदहर्नैव भुंजीत रात्रावपि कदाचन॥
सायंसंध्यायां सूर्यस्य ग्रस्तास्ते पूर्वेद्युः रात्रौ च न भोक्तव्यं॥ प्रातःसंध्यायां चं
द्रस्य ग्रस्तास्ते पूर्वरात्रावहनि च न भोक्तव्यमित्यर्थः॥ चंद्रग्रस्तास्ते तु त
द्दिने संध्याहोमादौ न दोषः॥ तद्धोमे शतनाः॥ ग्रस्ते चास्तंगते त्विंदौ शौरे वा मु

वभारणो॥ स्नानहोमादिकं कार्यं भुंजीतेंदूदये पुनः॥ एतदनाहिताग्निवि-
षयं॥ अपराह्णे व्रतोपायनीयमश्नीतइति कात्यायनोक्तेस्तस्य श्रौतत्वेन
विहितत्वेन च प्रबलत्वात्॥ आहिताग्निकर्तृकं यदिति निर्णयदीपः॥ रागप्राप्तभो-
जने कालनियमोयं॥ तेन ज्वरादाविव न भोजनमिति कर्कानुसारिणः॥ बा-
लवृद्धातुराणां तु ग्रहयामात्पूर्वमेकयामो निषिद्धः॥ सायाह्ने ग्रहणं चेत्स्याद-
पराह्णे न भोजनं॥ अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे॥ भुंजीत संगवे चे-
त्स्यान्न पूर्वं भोजनक्रियेति मार्कंडेयोक्तेः॥ इदं च बालादिविषयं॥ बालवृद्धातु-
रैर्दिनेतिरवौक्तेः॥ वेधकाले ग्रहणे वा पक्वमन्नं त्याज्यं॥ सर्वेषामेव वर्णानां
सूतकं राहुदर्शने॥ स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति हेमाद्रौ
षड्त्रिंशन्मतात्॥ शृतमिति तदंतरितस्योपलक्षणं॥ नवश्राद्धे च यत्तशिष्टं गृहे प-
र्युषितं च यदिति मिताक्षरायां वचनात्॥ नागवार्चनदीपिकायां ज्योतिर्नि-
२ बंधे च मेधातिथिः॥ आरनालं पयस्तक्रं दधिस्नेहाज्यपाचितं॥ मणिकस्थो- शिवः
दकं चैव न दुष्येद्राहुसूतके॥ मन्वर्थमुक्तावल्यां॥ अन्नं पक्वमिह त्याज्यं स्ना- ४१

नं सवसनं ग्रहे॥ वारितक्रारनालादि तिलदर्भैर्न दुष्यति॥ जले त्वदोषो गांगा
विषयः॥ अहोषितजलं पीत्वा पादकृच्छ्रं समाचरेदिति तत्रैव वचस्तु विशेष-
मतेन्यजलस्य दोषोक्तेः॥ वेधकाले ग्रहणे वा भोजने प्रायश्चित्तमुक्तं माधवी-
ये कात्यायनेन॥ ना॥ चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति॥ तस्मिन्नेव दि-
ने भुक्त्वा त्रिरात्रेण विशुध्यति इति॥ ग्रहणे च त्रिरात्रमेकरात्रं चोपवासः श्रेयो-
र्थिना कार्यः॥ एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च शक्तितः॥ कंचुकादिव सर्प-
स्य निर्मुक्तिः पापकोशतः॥ त्रिरात्रं समुपोष्यैवं ग्रहणे चंद्रसूर्ययोः॥ स्ना-
त्वा च विधिवन्मोरते भलता सहेति हेमाद्रौ लिंगोक्तेः॥ इदं च पुत्रवतिरि-
क्तविषयं॥ आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ पारणं चोपवासं च न-
कुर्यात्पुत्रवान्गृही इति जैमिनिवचनात्॥ यत्तु रवेर्ग्रस्तास्तस्तमये त्रिप-
हरं चयं हित्वा बालादिवद्भोजनं न तूपवासः॥ सायाह्ने ग्रहणं चेत्स्यादि-
ति प्रवोक्तमार्कंडेयवचनात्॥ मायाह्ने संगवे भीयाच्छारदे संगवादध-
मध्याह्ने परतो भीयान्नोपवासो रविग्रहे इति स्मृतिश्चेति हेमाद्रिः॥ शारदे

परामृतः॥ माधवमते तु पुत्रिणोपि तत्रोपवास एव॥ अहोरात्रं न भोक्तव्य-
मिति वाक्ये निषेधस्य तेनापि पालनीयत्वात्॥ उपवासनिषेधस्तु अन्तरु-
पवासपरः॥ सैकादशी निषेधवदिति॥ मदनरत्नेप्येवं॥ इदमेव युक्तं॥
वर्द्धमानस्य अहोरात्रं न भोक्तव्यमिति शातातपीयात् सूर्याचंद्रमसोर्ग्र-
हणं यावन्न याति मानवः इति फलश्रुतेस्तु स्यदर्शने उपवासः काम्यः॥ न त्वयं
निषेध इत्याहः॥ तन्न॥ अत्र व्रतत्वेपि प्राणत्सु विष्णुधर्मे निषेधावश्यंभावात्॥
तथा च व्यासः॥ रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा॥ चूडामणिरिति
ख्यातस्तत्र दत्तमनंतकं॥ वारेष्वन्येषु यस्तु स्यात् ग्रहणं चंद्रसूर्ययोः॥ तस्मात् एवं
कोटिगुणितं योगे चूडामणौ स्मृतं॥ अत्र माघेतयोः स्नानं कुर्यात्॥ ग्रस्य-
माने भवेत्स्नानं ग्रस्ते होमो विधीयते॥ मुच्यमाने भवेद्दानं मुक्ते स्नानं वि-
धीयते इति हेमाद्रौ वचनात्॥ स्नानं स्यादुपरागादौ मध्ये होमसुरार्चन- शिवः
मिति श्लोके वर्णाश्च॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने॥ सचैलं तु भ- ३४२
वेत्स्नानं सूतकान्नं च वर्जयेदिति वृद्धवसिष्ठोक्तेः॥ सचैलत्वं तु मुक्तिस्ना-

नपरमिति मदनरत्ने उक्तं॥ नागवार्चे नदीपिकायां चतुर्विंशतिमते॥ मुक्तौ
यस्तु न कुर्वीत स्नानं ग्रहणसूतके॥ स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः॥
इदं च स्नानममंत्रकं कार्यमिति स्मृतिरत्नावल्यां॥ तत्र तीर्थविशेषो नारदीये॥ गं-
गास्नानं च कुर्वीत ग्रहणे चंद्रसूर्ययोः॥ महानदीषु चान्यासु स्नानं कुर्याद्यथा वि-
धि॥ महानदीष्वपि मासविशेषे काश्चिच्छ्रेष्ठाः॥ प्रयागे देविकारे वा सन्निहत्या च
वारणं॥ सरस्वती चंद्रभागा कौशिकी तापिका तथा॥ सिंधुर्गंडकिका चैव सर-
स्वः कार्त्तिकादितः॥ मूलं हेमाद्रौ स्पष्टं॥ व्यासः॥ गवां कोटिसहस्रस्य यत्फलं ल-
भते नरः॥ तत्फलं लभते मर्त्यो ग्रहणे चंद्रसूर्ययोः॥ इंदोर्लक्षगुणं पुण्यं रवेर्दश-
गुणं ततः॥ गंगातोये तु संप्राप्ते इंदोः कोटी रवेर्दश॥ अत्र स्नाने तु माधवीये त-
त्वः॥ वापीकूपतडागेषु गिरिप्रस्रवणेषु च॥ नद्यां नदे देवखाते सरसीषु ध-
त्तरं॥ उष्णोदके न वा स्नायात् ग्रहणे चंद्रसूर्ययोः॥ अत्र तारतम्यं माह मार्कंडे-
यः॥ शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात्॥ भूमिष्ठमुद्धृतात्पुण्यं ततः प्र-
स्रवणोदकं॥ ततोपि सारसं पुण्यं ततः पुण्यं नदीजलं॥ तीर्थतोयं ततः पुण्यं म-

हानयं तु पावने॥ ततस्ततोपि गंगायां तु पुण्यं तु एभ्यस्ततो बुधैरिति॥ वृद्धोदक
तुरविषयं॥ तथा॥ गोदावरी महापुण्या चंद्रराहुसमन्विते॥ सूर्ये च राहुणा ग्रस्ते
तमोभूते महामुने॥ नर्मदातोयसंस्पर्शं ततत्कृत्यान्नर्वार्तिहा॥ इति चंद्रोदये प्र
भासखंडे॥ गंगा वो नाग्रास्ति नाधान्यं रम्यानिकनकं मरौ॥ संप्रदायक्रकुरुक्षेत्रे
यत्फलं लभ्यते नरैः॥ तद्दिंदुग्रहणे तोयस्नानान्नर्वाति षट्गुणं॥ तत्रैव सोमपुष्क
रां बुधिः स्नानमुपक्रम्य॥ स्नानानि यानि लोकेषु विख्यातानि मनीषिभिः॥ तेषां
फलमवाप्नोति ग्रहणे चंद्रसूर्ययोः॥ देवीपुराणे॥ गंगाकनखलं पुण्यं प्रयागं पु
ष्करं तथा॥ कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे॥ स्नानासनं तु वेस्मरणं वा का
र्यं॥ स्मृत्वा शतक्रतुफलं दद्यात् सर्वाघनाशनं॥ स्पृष्टुगोमेधपुण्यं तु पीत्वा सो
त्रामणेर्लभेत्॥ स्नात्वा वाजिमखं पुण्यं प्राप्नुयाद्दविचारतः॥ रविचंद्रोपरागे
च अयने चोत्तरे तथेति नारदीयोक्तेः॥ अत्र श्राद्धमाह कृष्णशृंगः॥ चंद्रसूर्य
ग्रहे यस्तु श्राद्धं विधिवदाचरेत्॥ तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे॥ मा शिव:
रतो सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने॥ अकुर्वाणस्तु नास्तिक्यात् पंके गौ ४३

रिव सीदति॥ विष्णुः॥ राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं॥ इदं चामान्नेन हेम्ना
वा कार्यं न त्वन्नेन॥ आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा॥ आमश्राद्धं प्रकु
र्वीत हेमश्राद्धमथापि वा इति शातातपोक्तेरिति हेमाद्रिमाधवादयः॥ अपरार्क
स्तु॥ एतद्द्विजानां पाकाभावे द्रष्टव्यं तीर्थश्राद्धवत्॥ पाकाभावे द्विजाती[illegible]ना
नामामश्राद्धं विधीयत इति सुमंतूक्तेः॥ मैत्रायणीये यदा सूर्यं ग्रसते पर्वसंधि
षु॥ गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्॥ घृतेन भोजयेद्विप्रान् घृतं
भूमौ समुत्सृजेदिति वायवीयोक्तेश्चेत्याह॥ विज्ञानेश्वरोप्याह॥ ग्रहणश्राद्धे
कु भोक्तुर्दोषो दातुरभ्युदय इति॥ सूतके मृतके चैव गृहीते शशिभास्करे॥ छा
यायां हस्तिनश्चैव नाद्यात् पुरुषोऽनवेत्॥ इत्यापस्तंबेन भोजननिषेधात्॥ भो
ज्ये च निषेधः श्राद्धे भोक्तुः हस्तिच्छायासाहचर्यात्॥ अत्र ग्रहणनिमित्तकश्रा
द्धेन वामावास्यासंक्रांत्यादिनिमित्तकानां सिद्धिः॥ दार्शिकान्यप्रयोगयो रप
तिकालादर्शोक्तेः॥ आशौचमध्येपि स्नानश्राद्धादिकार्यमेव॥ सूतके मृ

केचैवं न दोषो राहुदर्शने॥ तावदेव न वेधुर्दिर्यावन्मुक्तिर्न दृश्यत इति माधवो-
क्तेश्च वृद्धवसिष्ठोक्तेः॥ स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतक इति व्याघ्रपदोक्ते॥
कालादर्शेऽङ्गिराः॥ सर्वे वर्णाः सूतकेपि मृतके राहुदर्शने॥ स्नात्वा श्राद्धं प्रकु-
पारिजाते र्वीत दानं शाठ्यविवर्जितं॥ मदनरत्नेप्येवं॥ तेन स्नानमात्रं प्रकुर्वीत दानं शा-
ठ्यविवर्जितमिति निर्मूलं वदंतो गौडाः परास्ताः॥ इयं च शुद्धिर्विशेषान्मंत्रदी-
क्षाजपस्मरणादिसर्वस्मार्तकर्मविषया॥ मदनरत्नेप्येवं॥ रजस्वलायास्तु
मार्गवार्चनदीपिकायां स्मृत्यर्थसारनिबंधे॥ न सूतकादिदोषोस्ति ग्रहे होमजपा-
दिषु॥ ग्रस्ते स्नायादुदक्यापि तीर्थादुद्धृतवारिणेति॥ अत्र स्नाने नैमित्तिके प्रा-
प्ते नारी यदि रजस्वला॥ पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेदित्यादिमिता-
क्षरोक्तो विधिर्ज्ञेयः॥ तथा ग्रहणे रात्रावपि श्राद्धादिकार्यं॥ ग्रहणोद्वाहसंक्रांतिया-
त्रार्तिप्रसवेषु च॥ दानं नैमित्तिकं देयं रात्रावपि तदिष्यत इत्यपरार्के व्यासोक्तेः॥
चंद्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यत इति देवलोक्तेश्च॥ यत्तु ज्योतिःशास्त्र शिव
गम्ये दिने चंद्रग्रहो रात्रौ च सूर्यग्रहः तदा स्नानादि न कार्यं॥ सूर्यग्रहो यदा ४४

रात्रौ दिवा चंद्रग्रहस्तथा॥ तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति॥ षड्विं-
शन्मतात्॥ ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपारिजाते गोभिलः॥ दर्शे रवि-
ग्रहे पित्रोः प्रत्याब्दिकमुपस्थितं॥ अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुत इति॥
अत्र दर्शरविग्रहपदे तु तदादेः प्रदर्शनार्थाः॥ न्यायसाम्यात्॥ तेन चंद्रग्रहणेपि
सपिंडनापिंडादि वार्षिकमन्नादिना तद्दिन एव कार्यमिति मदनपारिजाते व्या-
ख्यातं॥ पृथ्वीचंद्रोदयेप्येवं॥ तेनामश्राद्धं प्रकुर्वीत मास संवत्सरादत इति॥
अन्नेन वार्षिकं कुर्याद्धेम्ना वामेन न क्वचिदिति मरीचिलौगाक्ष्यादिवचनानि ता-
नि ग्रहणदिनातिरिक्तविषयाणि॥ निर्णयामृतेप्येवं॥ यत्तु॥ ग्रहणं तु द्विती-
येह्नि रजोदोषात्तु पंचमे॥ तथा॥ अस्तोदये यदा चंद्रे प्रत्यब्दं समुपस्थितं॥ न दि-
नो वोपवासः स्यात्प्रत्यब्दं तु परेहनि॥ तथा॥ ग्रस्ताववास्तमानं तु रवींदू प्राप्नु-
तो यदि॥ प्रत्यब्दं तु तथा कार्यं परेहन्येव सर्वदा॥ चंद्रसूर्योपरागे च तथा श्रा-
परेहनीत्यादीनि वचनानि तानि महानिबंधेष्वप्यनुपलंभान्निर्मूलानि॥
अत एव केचिन्निबंधेषु तद्दिन एवामश्राद्धमुक्तमित्यलं॥ ग्रहणादिसमदि

पर्यंतं रामगोपालाद्यागमदीहोकाशिवार्चनचंद्रिकायां॥ज्ञानार्णवे॥मंत्रे
धारेन्नरणोकयत्नतग्रहणे चंद्रसूर्ययोः॥ग्रहणं वापि देवेशि कालेःमसदिनावधि॥
धीति॥रत्नसागरे॥सतीर्थे कें विधुग्रासे नतं द्रुदामनपर्वणि॥मंत्रदीक्षां प्रकुर्वी
णो मासर्क्षादीन्न शोधयेत्॥अत्र सूर्यग्रहणमेव मुख्यं॥सूर्यग्रहणकालेन तु ना
न्यदन्वेषितं नवेत्॥सूर्यग्रहणकालेन समो नान्यः कदाचन॥न मासतिथिवा
रादिशोधनं सूर्यपर्वणीति॥तत्रैव कालोत्तरवचनात्॥चंद्रग्रहे तु यादीक्षाया
दीक्षाव्रतचारिणां॥वनस्थस्य च यादीक्षा हारिद्र्यस मजन्मास्विति तन्त्रे वयोगि
नीतंत्रे निषेधाच्च॥ग्रहणं च जन्मराश्यादौ निषिद्धं॥तदुक्तं ज्योतिषे॥त्रिषड्
दशायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवींद्वोः॥द्विसप्तनंदेषु च मध्यमं स्या
च्छेषेष्वनिष्टं कथितं मुनीन्द्रैरिति॥आय एकादश॥नंदा नव॥इषुः पंचाम
दनरच्छेगगः॥जन्मसप्ताष्टरिष्फांकदशमस्थे दिवाकरे॥दृष्टोरिष्टप्रदो राहु शिवः
र्जन्मर्क्षे निधने तथेति॥रिष्फं द्वादशं॥अंका नव॥निधनं सप्तमतारा॥दृष्टा
चंद्रोदये विलुधर्मौ॥यन्न्येन्नत्रगतो राहुर्ग्रसते शशिभास्करौ॥तज्जातानां न वे ४५

त्पीडा ये नराः शांतिवर्जिताः॥तत्रैव पुराणांतरे॥सूर्यस्य संक्रमो वापि ग्रहणं चंद्र
सूर्ययोः॥यस्य त्रिजन्मनक्षत्रे तस्य रोगोथवा मृतिः॥तस्य दानं च होमं च देवा
र्चनजपौ तथा॥उपरागाभिषेकं च कुर्याच्छांतिर्न विद्यते॥स्वर्णेन वाथ पिष्टेन
कृत्वा सर्पस्य चाकृतिं॥आलणाय ददेत्तस्य नरोगादिभ्य तदर्हत॥जन्मनक्ष
त्रं तत्सर्वे नरेन्द्रत्रिजन्मनक्षत्रमित्यच्यते॥जन्मदशमैकोनविंश ताराइति
केचित्॥सर्पस्य तदाकारस्य राहोरित्यर्थः॥अद्भुतसागरे नागवः॥यस्य राजस्य
नक्षत्रे स्वर्भानुरुपरज्यते॥तस्य रोगं सुहृन्नाशं मरणं चात्र निर्दिशेत्॥राज
स्य नक्षत्रं अभिषेकनक्षत्रे इति तस्यैव व्याख्यातं॥नागवार्चनदीपिकायां ज्यो
तिःसागरे॥सौवर्णं कारयेन्नागं पलेनाथ पलार्द्धतः॥तदर्द्धेन तदर्द्धेन फणा
यां मौक्तिकं न्यसेत्॥ताम्रपात्रे निधायाथ वृत तस्यौ विशेषतः॥कांस्ये वा कांति
मोहे वान्यस्य दद्यात्सदक्षिणं॥चंद्रग्रहेतु रूप्यस्य बिंबं दद्यात्सदक्षिणं॥ना
गं कृष्णमयं सूर्यग्रहे बिंबं च हेमजं॥तुरंगरथगोभूमितिलसर्पिष्षकां
चनं॥कालविवेकेपि॥सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनं॥सदक्षि

तं सवत्सं च ब्राह्मणाय निवेदयेत्॥ सौवर्णं राजतं वापि बिंबं कृत्वा स्वशक्ति
तः॥ उपरागजक्लेशछिद्रे विप्राय कल्पयेत्॥ मंत्रस्तु॥ तमोमय महाभीम सो
मसूर्यविमर्दन॥ हेमताराप्रदानेन मम शांतिप्रदो भव॥ विधुंतुद नमस्तुभ्यं
सिंहिकानंदनाच्युत॥ दानेनानेन नागस्य रक्ष मां वेधजाद्भयात्॥ इति॥ मंत्रशां
तिरूपकः॥ हेमाद्रौ मात्स्ये॥ यस्य राशिं समासाद्य भवेत् ग्रहणसंभवः॥ स्नानं
तस्य प्रवक्ष्यामि मंत्रौषधिसमन्वितं॥ चंद्रोपरागं संप्राप्य कृत्वा ब्राह्मणवा
चनं॥ संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः॥ पूर्वमेवोपरागस्य समा
नीयौषधादिकं॥ स्थापयेच्चतुरः कुंभानव्रणान् सलिलान्वितान्॥ गजाश्व
रथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ राजद्वारप्रदेशाच्च मृदमानीय निक्षि
पेत्॥ पंचगव्यं पंचरत्नं पंचत्वक् पंचपल्लवं॥ रोचनं पद्मकं शंखं कुंकुमं रक्त
चंदनं॥ शुक्तिस्फटिकतीर्थांबु सितसर्षपगुग्गुलान्॥ मधूकं देवदारुं च वि
ष्णुक्रांतां शतावरीं॥ बलां च सहदेवीं च निशाद्वितयमेव च॥ गजदंतं कुंकु शिवः
मं च तथैवोशीरचंदनं॥ एतत्सर्वं विनिक्षिप्य कुंभेष्वावाहयेत्सुरान्॥ सर्वे ४६

समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः॥
योसौ वज्रधरो देव आदित्यानां प्रभुर्मतः॥ सहस्रनयनश्चंद्रग्रहपीडां व्यपोह
तु॥ मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः॥ चंद्रोपरागसंभूतामग्निः पीडां व्य
पोहतु॥ यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः॥ यमश्चंद्रोपरागोत्थां ग्रहपी
डां व्यपोहतु॥ रक्षोगणाधिपः साक्षात् नीलांजनसमप्रभः॥ खड्गहस्तोतिभीमश्च
ग्रहपीडां व्यपोहतु॥ नागपाशधरो देवः सदा मकरवाहनः॥ स जलाधिपतिर्दे
वो ग्रहपीडां व्यपोहतु॥ प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः॥ वायुश्चं
द्रोपरागोत्थां ग्रहपीडां व्यपोहतु॥ योसौ निधिपतिर्देवः खड्गशूलगदाधरः॥
चंद्रोपरागकलुषं धनदोत्र व्यपोहतु॥ योसाविंदुधरो देवः पिनाकी वृषवाहनः॥
चंद्रोपरागपापानि स नाशयतु शंकरः॥ त्रैलोक्ये यानि भूतानि स्थावराणि
चराणि च॥ ब्रह्मविष्ण्वर्करुद्राश्च दहंतु मम पातकं॥ एवमावाहयेद्देवान् मं
त्रैरेतैश्च वारुणैः॥ एतानेव तथा मंत्रान् स्वर्णपट्टे विलेखयेत्॥ ताम्रपट्टे चैव
वा लिख्य नववस्त्रे तथैव च॥ मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः॥

कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्॥ गृहीत्वा स्नापयेत्पूर्वं तत्र
कोपरिस्थितं॥ इत्थं रुद्रमंत्रेण यजमानं द्विजोत्तमाः॥ अभिषेकेन तत्र
यो मंत्रैर्वारुणैः सूक्तैः॥ आचार्यं वरयेत्तस्मै स्वर्णपट्टं निवेदयेत्॥ आचा
र्यो दक्षिणां दद्याज्जो दानं च स्वशक्तितः॥ होमं वापि प्रकुर्वीत तिलैर्व्याहृति
भिस्तथा॥ दानं च शक्तितो दद्यात्यदीच्छेदात्मनो हितं॥ सूर्यग्रहे सूर्यनाम
मुक्तं मंत्रोऽपि कीर्तयेत्॥ अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत्॥ न
तस्य ग्रहणे दोषः कदाचिदपि जायते॥ ॥इति ग्रहणशांतिः॥ ॥ज्यो
र्वेचन दीपिकायां अलमित्यते॥ सर्वैः पठस्थितं बीजं यस्य स्थले तेषां बुद्ध
यो॥ ग्रहणं तु विलीनाख्यं न पश्येत् परं विना॥ तथा मंगलकृत्येषु वेधावि
शेषो हेमाद्रौ॥ त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं॥ मांगल्येषु सम
स्तेषु ग्रहणे चंद्रसूर्ययोः॥ प्रकारांतरं तत्रैवोक्तं॥ द्वादश्यादितृतीयां तो वे
धः स्याद्ग्रसे तु नः॥ एकादश्यादिकः शोरेश्च तुर्थ्यंतम्प्रकीर्तितः॥ इदं च खं शिवा।
डग्रासे॥ अहं खंडग्रहे तयोरिति तत्रैवोक्तं॥ इदं च ग्रस्तास्तत्रिदिनं सर्व ४७

मिति नारदेन ग्रस्तास्ते विशेषोक्तेः ग्रस्तास्तन्निग्रहणपरो॥ ज्योतिर्निबंधे
च्यवन॥ ग्रहणे सप्तकं त्याज्यं मंगलेषु ऋतुत्रयं॥ यावच्चरविणा तु स्नानमु
कं नंदग्धकाष्ठवत्॥ अन्यानि चाग्रे यदि मंडलानि तत्फलं वर्णविकारादिफ
लं च दैवज्ञेभ्यो ज्ञेयं॥ पुरश्चरणं चांद्रिकायां॥ चंद्रसूर्योपरागे च स्नात्वा प्र
यतमानसः॥ स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रं समाहितः॥ जपाद्दशांशतो होमः
तथा होमाद्धुतर्पणं॥ तर्पणस्य दशांशेन मार्जनं कथितं किल॥ तत्रैव वह्निदेव
तारूपं ध्यात्वात्मानं प्रपूज्य च॥ नमोंतं मंत्रमुच्चार्य तदंते देवतान्निधां॥ द्विती
यां तां महे पश्चात्तर्पणं चाप्यनेन तु॥ ताये स्वाहा लिनामध्ये रज्ञिषिचे स्वमूर्द्धनि॥
मार्जनस्य दशांशेन ब्राह्मणान्नपि भोजयेत्॥ जपो च हि सर्वको होमस्तर्पणं चाभि
षेचनं॥ स्वदेवसज्जनं पंचप्रकारो स्यात्पुरस्क्रिया॥ तथा॥ होमाशक्तौ जपं कुर्यात्
होमसंख्याचतुर्गुणं॥ एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमा॥ ग्रहणस्य संगा
त् कुरुक्षेत्रप्रति ग्रहे प्रायश्चित्तमुच्यते॥ तथा रूणस्मृतौ॥ प्रतिग्राही कुरु
क्षेत्रे नन्दपः प्ररूपान्निवेदा॥ तथापि मनसः शुद्ध्यै प्रायश्चित्तं समाचरेत्॥

तृप्तश्चक्षुर्द्वयं कयादैंदेवेनसमन्वितः॥ मन्त्रेण यजेताय जपेद्वा लक्षसं
कं॥ वापीकूपतडागानि शिवेन नैर्विसृजेद्धनमिति॥ एतच्च॥ यजरिति नार्जितं
कर्मणा आर्जितेन धनं॥ तस्याः सर्वेगोभ्युध्यंतिदानेन तपसैवचेतिमन्वादिके स्मृ
ती सर्वज्ञेयमित्यादिकं॥ ग्रहणं तदितस्य सर्वं संकल्पितद्रव्यस्य हेतुगुण्यं न वर्त
तिशिष्टाः पठंति च॥ ल्वशुष्कं लं वेवर्ते॥ हातव्यमिति नो कास्यां वक्तव्यं कर्त्रा चि
कल्पितं॥ अहोरात्रमतिक्रम्य तद्दानं द्विगुणं नवेत्॥ इत्योत्तरं पर्व सुस्यात्तु तं
वै ग्रहेण वेता॥ सूर्यग्रहे सहस्रं तन्मरणेन तर्कं स्वतं मिति॥ अत्र मूलं चिंत्यं॥
अत्र केचिद्दोषं वस्त्याः आहुः॥ ग्रहणस्य निमित्तत्वेन तन्निमित्तस्य प्रयोजन ग्रय
कत्वात् ज्योतिःशास्त्रादिना जातस्य ज्ञानस्य निमित्तत्वे प्राप्तेऽपि॥ स्नानं दानं
ततः श्राद्धमनंतरा हुदर्शने॥ चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति जा
बाल्यादिवचनेषु दृष्टिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेन निमि
त्तत्वं॥ अन्यथा दृशो लक्षणा स्यात्॥ तेनमेघाच्छादनेंधादीनां जन्मगमनादृष्ट शिवः
त्वादिनिषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकार इति॥ कल्पतरुरप्याह॥ ४८

दर्शनशब्देन चाक्षुषज्ञानं गृह्यते तेन ज्ञानमात्रं अज्ञानस्य निमित्तत्वासंभवा
न्निमित्तमहिम्नैव ज्ञानत्वान्नेन दर्शनपदवैयर्थ्यापत्तेः॥ तेन चाक्षुषधीयोग्य
कालः पुण्यः॥ योग्यत्वं च प्रयत्नानपनेयचाक्षुषज्ञानप्रतिबंधकराहि
त्यं॥ तेन मेघच्छन्नेयोग्यतान्नावान्न स्नानादीनि॥ निर्णयामृतेप्येवं॥ तदेतत्तु
च्छं॥ यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा॥ सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्त
था॥ तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति वाक्यं व्यर्थं स्यात्॥ चाक्षुष
ज्ञानाभावेनैवाप्राप्तत्वात्॥ तस्मात् वक्तव्याच्च निषेधस्यान्यचेदस्तास्तपरं॥
रविचंद्रयोरस्तानंतरं रात्रिदिवाग्रहरूत्वादिति वाच्यं॥ तत्रेति पदस्य ग्रहपर
त्वेधिकरणत्वायोगान्निमित्तपरत्वे च तज्ज्ञाननिमित्तकस्नानादेरस्तात्प्राग
प्यनावापत्तेः॥ अथ तत्रेति रात्रिरिन उच्यते सा वैश्वदेवीति वक्तुं न्हतेऽपि॥
तन्न॥ तादृशमंत्रालिंगानाभावात्॥ तयोर्निमित्तत्वाधिकरणत्वे वान्यप्रयुक्तेस्नाना
पत्नाचापत्तेश्च॥ किंच॥ कृतान्यत्तमादित्यं नास्तं यंतं कदाचन॥ नोपरक्तं नवारि
स्थं नमध्यं नभसो गतमितिमनुवचनं॥ बाध्येत॥ दृष्टेरिष्टप्रदो राहुरित्यप

च॥ न चात्राविहितदर्शननिषेधाप्रवृत्तिवस्यैदासनीयतापि न युक्ते ति
वाच्यं॥ दर्शनस्यानुवादेनाविधेयत्वाभावात्॥ एतच्चाग्रे वक्ष्यामः॥ तत्त्वप्र
विरुद्धत्रिकद्वयापत्तेः॥ अस्तु तर्हि दर्शनविधानेन संकोच इति चेन्न॥ न मुक्ति
दृष्ट्वा ततः स्नायादिति मुक्तिस्नानेपि चाक्षुषज्ञानस्य निमित्तत्वापत्तेः॥ अस्तु
किं न च्छिन्नमिति चेन्न॥ नाग्रस्तास्ते तयोः पश्येदुदये दृष्ट्वान्यवहरेद्बुधा इ
ति दर्शनोत्तरं स्नानविधानाद्वेधस्य पूर्ववेधकालेऽवयावद्दर्शनं भोजन
निषेधापत्तिः॥ मध्यं भीन्दूतस्य सुतरां यावद्बुद्धः ग्राह्यस्य वा स प्रसंगश्च॥ अ
थानेनोल्लुपतया तत्र ज्ञानमात्रं विवक्ष्यते तत्सर्वमपि नैर्लोके न स्वीक्रियतां॥
एतेन यत्केनचिदुक्तं॥ स्पर्शमात्रं मुक्तिस्नानं च यस्य दर्शने तेनैव कार्यं ना
न्येन॥ क्त्वाप्रत्ययेन समानकर्तृत्वावगतेरिति तन्निरस्तं॥ कातर्हि तस्य ग
तिः॥ इत्थं रुद्रादिविशेषणत्वाजहत्स्वत्ववद्विवक्षियार्थता॥ सिद्धज्ञानमा
त्रानुवादत्वे सर्वमुखं अंगुलाघनाद्दश्यग्रहण्याद्वा दर्शनस्यार्थवत्वं॥ शिवः
न चोक्तयोग्यतापि माध्री॥ दर्शनोत्तरं मेघच्छन्ने योग्यताभावापत्त्यादानाच्च ४९

भावापत्तेः॥ तेन तत्र ग्रस्तावच्छेदेन ज्योतिःशास्त्रावेद्यत्वमेव योग्यता॥ किंच॥
रजस्वला दर्शने नारी त्रिरात्रमशुचिर्भवेदित्यत्रार्थं धर्मिणामाशौचाभावप्रसंगः॥
यत्तु वर्द्धमानेनोक्तं॥ ज्ञानोत्तरं त्वधिकारो न ज्ञानकाले॥ स्नानकाले ज्ञानाभावा
त्॥ एवं दर्शनोत्तरं मुक्तिपर्यंतमस्त्येव योग्यतेति॥ तदपि प्रतिज्ञामात्रं॥ किंच॥ ग्रस्ता
परेद्यु स्तेतयोरुदये दृष्ट्वान्यवहरेत्तु चिरित्यादिवाक्यवैयर्थ्यापत्तेः॥ चाक्षुषज्ञानान्य
थानुपपत्त्या वार्थादुदयस्नानसिद्धेः॥ न च मुक्तिस्नाने साक्षीयमेव ज्ञानं निमि
त्तं न चाक्षुषं॥ चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि दर्वतः॥ राहोर्विमुक्तिं विज्ञाय स्ना
त्वाश्नीत नाजनमिति वचनोत्तमे न विज्ञायेति ज्ञानमात्रोक्तेः॥ यत्तु मुक्तिं दृष्ट्वा
तुनो कथं स्नानं स्यात्ततः परमिति॥ तदपि ज्ञानमात्रपरं॥ मिश्रमालादिदोष
त्वादिह मुक्तिर्न दृश्यते॥ आकल्पयतु तं कार्यं स्नात्वा भुंजीत वाग्यत इति गौड
बंधवचनात्॥ नैवं॥ अज्ञातस्यानिमित्तत्वाभावेन निमित्तमहिम्नैव ज्ञाना
क्षेपेनैवाक्यवैयर्थ्यात् प्रस्तास्तापितदापत्तेश्च॥ किंच॥ दर्शने विशेषणानुपद
र्शने॥ ना नाद्य॥ दर्शनावच्छिन्नकाले स्नानञ्जलादाना देर्वा धात्॥ दर्शने

विद्धे दृष्टतमपि स्नानादि न ग्रहणनिमित्तं स्यात्॥ नांत्यः॥ यावद्दर्शनगोचर-
तिया वक्तव्यत्वे प्रसंगात्॥ दृष्टग्रहस्य ग्रहणोत्तरमपि स्नानाद्यापत्तेश्च॥
न पक्षेप्येष दोषः स्यादिति चेत्॥ मुख्योसि॥ यदि ज्ञानं वा चक्षुःपरंपर्यता॥ न तु
स्यान्वयो विचार्यते॥ दृशि स्थूलत्यतद् इति वैषम्यं कथं तदि ज्ञानं लक्ष्यते॥ संक्रांतौ
स्नायादिति वदर्थादित्यवेहि॥ अश्रुतत्वादेव नो दृश्यविशेषणविवक्षा दृष्टतावा
क्यभेदापि॥ अस्तु तर्हि दृष्टग्रहणं निमित्तमिति चेन्न॥ ग्रस्तास्तस्तात्तरं स्नानापत्तेः॥
विशिष्टोद्देशे वाक्यभेदाच्च॥ तदायेतदुक्त्यमिति चेन्न॥ यावद्दर्शनगोचर इति व
चनेन तन्निषेधात्॥ तद्वदन्यग्रह इव ग्रस्तास्तेपि स्यात्॥ किं च॥ दर्शनस्य विधि
रनुवादो वा॥ आद्ये ग्रहणोद्देशेन दर्शनविधिरुत दर्शनविशिष्टस्नानविधिरुत
स्नानोद्देशेन दर्शनविधिः॥ नाद्यः॥ ग्रहोद्देशेन स्नानविधाने दर्शनविधाने च वा
क्यभेदात्॥ एतेन द्वितीयोपि परास्तः॥ न तृतीयः॥ स्नानस्याप्राप्तेः॥ दर्शनस्य नि शिव
मित्तत्वेनाविधेयत्वाच्च॥ अन्यथा सोमवपनादौ प्रसंजयन्नविधिः केन वार्य ५०
ते॥ अथ नान्या वाक्येषु कचिद्दर्शनविशिष्टस्नानविधिः॥ कचिच्च॥ त्राद्यं दर्शनं

निमित्तीकृत्य स्नानमात्रविधिः॥ तन्न॥ स्नानस्य प्रधानस्य प्राप्तौ तदंगदर्शनप्रा
प्तिः॥ तस्यां च निमित्तत्वे सति स्नाननिमित्यन्योन्याश्रयात्॥ एवं दर्शनविधौ सति त
न्निमित्तकस्नानविधिः॥ सति च प्रधानस्नानविधौ तदंगदर्शनविधिः॥ एवमधि
कारे प्रयोजकत्वे च योज्यं॥ स्नात्पूर्वकालत्वविधौ चास्त्येव वाक्यभेदः॥ अन्यथा
स्नानोत्तरमपि दर्शनमंगं स्यात्॥ न द्वितीयः॥ दर्शनविशिष्टग्रहस्य विशिष्टस्या
नुवादे वाक्यभेदापत्तेः॥ न च हविरार्तिवद्विशिष्टं निमित्तमिति वाच्यं॥ आर्तिमा
त्रस्य हि निमित्तत्वे निमेषाद्यार्तेरपि तत्वापत्तेर्नैमित्तिकत्वभंगापत्तेश्च विशि
ष्टोद्देश्यत्वं॥ इह तु ग्रहणमात्रस्य निमित्तत्वे न काचित् क्षतिः॥ तस्माद्दर्शनवाक्या
नां ग्रस्तास्तविषयत्वात् तज्ज्ञानस्य चार्थतः प्राप्तत्वदेव निमित्तं॥ तेन मेघाच्छादने
धारेश्च स्नानादि भवत्येवेत्यलं वेदबाह्यैः संलापैः॥ ॥ इति ग्रहणनिर्णयः॥
अथ समुद्रस्नानं॥ ॥ आश्वलायनः॥ समुद्रं पर्वसु स्नायादमायां च विशे
तः॥ पापैर्विमुच्यते सर्वैरमायां स्नानमाचरन्॥ न्यस्तु सोमदिने स्नानं नि
वा विवर्जयेत्॥ नारदः॥ अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन॥ अश्व

मंद्रवोरेतु सागरे पर्वणि स्पृशेत्॥ पृथ्वीचंद्रोदये स्कांदे॥ धुनाति पर्वणि चर
नैर्मलः सरितां पतिः॥ कदाचिदपि नैवात्र स्नानं कुर्यादपर्वणि॥ अस्यापवा श्र॥
अत्रैव प्रभासखंडे॥ पर्वकाले च संप्राप्ते नदीनां च समागमे॥ सेतुबंधे तथा ते
धौतीर्थेष्वन्येषु संयुतः॥ एवमादिषु सर्वेषु मेध्यान्येतु स्वकर्मणि॥ तथा॥ द्विज तैः ॥
त्रैर्विना पर्व क्षुरकर्म विना नरैः॥ करांग्रेणापि देवेशि न स्पृष्टव्यो महोदधिः॥ त
था॥ न कालनियमः सेतौ समुद्रस्नानकर्मणि॥ तद्विधिश्च तत्रैव॥ पिप्पलादस
मुत्पन्ने कृत्ये लोकभयंकरे॥ पाषाणं ते मया दत्तमाहारार्थं प्रकल्पितमिति पाषाणं
प्रक्षिप्य॥ विश्वाची च घृताची च विश्वयोनिर्विशांपते॥ सान्निध्यं कुरु मे देवसाग
रे लवणांभसि॥ अग्नियोनि॥ नमस्ते विश्वगुप्ताय नमो विष्णो अपां पते॥ नमो जल
विरूपाय नदीनां पतये नमः॥ समस्त जगदाधार शंखचक्रगदाधर॥ देव देहि म
मानुज्ञां तव तीर्थनिषेवणे॥ त्रितत्त्वात्मकमीशानं नमो विष्णुमुमापतिं॥ सान्निध्यं
कुरु देवेश सागरे लवणांभसि॥ अग्निश्च योनिरनिलश्च देहो रेतोधा रत्नभृत शिवः
स्य नाभिः॥ एतद्ब्रुवन्पांडव सत्यवाक्यं ततोवगाहेत पतिं नदीनामिति स्ना ५१

रतो कर्ममंत्रान्पठित्वा विधिवत्स्नात्वा॥ सर्वरत्नोद्भव श्रीमान्सर्वरत्नाकरो यतः॥
सर्वरत्नप्रधानस्त्वं गृहाणार्घं महोदधे इत्यर्घं दत्वा तर्पयेत्॥ यथोक्तं पृथ्वीचं
द्रोदये स्कांदे॥ पिप्पलादं विकल्पं च कृतांतं जीवकेश्वरौ॥ वसिष्ठं वामदेवं
च पाराशरमुमापतिं॥ वाल्मीकिं नारदं चैव वालखिल्यांस्तथैव च॥ नलं
नीलं गवाक्षं च गवयं गंधमादनं॥ जांबवंतं हनूमंतं सुग्रीवं चांगदं तथा॥ मै
दं च द्विविदं चैव वृषभं शरभं तथा॥ रामं च लक्ष्मणं चैव सीतां चैव यशस्वि
नीं॥ एतांस्तु तर्पयेद्विद्वान् जलमध्ये विशेषतः॥ आब्रह्मस्तंबपर्यंतं यत्किंचि
त्सचराचरं॥ मया दत्तेन तोयेन तृप्तिमेवाभिगच्छत्विति॥ ॥इति श्री
मीमांसकभट्टनारायणसूरिसुतरामकृष्णभट्टात्मजदिनकरभट्टा
जकमलाकरभट्टकृते निर्णयसिंधौ प्रथमः परिच्छेदः॥ ॥छ॥
॥श्री॥ ॥शुभं भवतु॥ ॥छ॥ ॥श्री॥ ॥छ॥ मंगलमस्तु
॥छ॥ ॥श्री॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥छ॥

